THE

HARIDAS SANSK

111

THE

Samavediya Ahnika

(THE KAUTHUMA RECENSION)

Compiled from the Subodhinipaddhati of

S'IVARAMA.

Edited by

Samaveda Vachaspati Pandit Durgadatta Tripathi

॥ श्रीः ॥

सामवेदीयाह्निकम् ।

(कौथुमीशाखिनां सामवेदीनामत्यन्तमुपकारकम्)

श्रीशुक्लविश्रामात्मजशिवरामवीरचितसुबोधिनीपद्धतेः सङ्गृहीतम् ।

तच्च—

श्री शुक्लतीर्थनिवासिनां आहिताग्निनां चातुर्मास्ययाजिनां

श्रौतस्मार्तकर्मनिष्णातानां

श्रीशुक्लोपाव्ह गौरीशङ्करशर्म-

महोदयानामनुज्ञया साहाय्येन च

श्रीजोखीराम मटरूमल गोयनका संस्कृत-महाविद्यालयीय

सामवेदाध्यापकेन

पं० दुर्गादत्तत्रिपाठिना टिप्पण्यादिभिरलंकृत्य संशोधितम् ।

वि० संवत् १९९६

PUBLISHED BY
JAYA KRISHNA DĀS HARIDĀS GUPTA
The Chowkhamba Sanskrit Series Office,
Benares City.

प्रकाशक—
चौखम्बा संस्कृत पुस्तकालय,
बनारस सिटी ।

Printed at the Vidya Vilas Press, Benares.
19[illegible]

॥ श्रीहरिः ॥

प्राक्कथनम् ।

सुविदितमेवैतत् तत्रभवतां विदुषां यत् अपारदुःखोदधौ संसारे संसरतां देहिनां दुःखोद्धारकं नित्यनिरतिशयसुखावाप्तिसाधनं स्वीयवर्णाश्रमानुसारेणानुष्ठितं श्रुतिस्मृत्युक्तं धर्मापरपर्यायं कर्मैवेति । तदुक्तं "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳसमाः" इति श्रुतेः "स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते पराम्" । "स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः" इत्यादिस्मृतेश्च ।

तत्र नित्यनैमित्तिककाम्यप्रायश्चित्ताख्येषु चतुर्विधेष्वपि कर्मसु अकरणे प्रत्यवायजनकत्वान्नित्यमेव कर्म प्रतिदिनमनुष्ठेयत्वाच्च विशेषतो जिज्ञास्यपदवीमधिरोहति ।

अतः कौथुमीशाखिनां सामवेदीनामुपकारायैतदान्हिकं श्रीशुक्ल-शिवरामविरचितसुबोधिनीपद्धतेः समुद्धृत्येदानीं प्रकाश्यते ।

सत्स्वप्यनेकेषु पुरा प्रकाशितेषु सामवेदीयान्हिकेषु परमधुना दुर्लभप्रायेषु तेषु एतदान्हिकं स्वीयकर्मचिकीर्षूणां जिज्ञासुजनानां महदुपकरिष्यति इत्याशासे ।

अयं श्रीशिवरामशुक्लो बहुविधोपयोगिविषयोपनिबद्धानेकान्निबन्धान्साशाखिनां जनानामुपकाराधारचितवान् तेषु "सुबोधिनी" नाम्नी पद्धतिरिदानीं प्रकाशयितुमारब्धा । साऽचिरादेव श्रीमतां नयनपथो गोचरीभविष्यति । तत एवोद्धृतमेतदान्हिकम् ।

यदि भगवतो जगदीश्वरस्यानुकम्पा स्यात्तर्हि श्रीशुक्लशिवरामस्यान्येऽपि निबन्धाः यथावसरं क्रमशः प्राकाश्यं गमिष्यन्ति ।

यद्यस्य ग्रन्थस्य साहाय्येन जिज्ञासूनां कोऽप्युपकारो भवेत्तर्ह्ययं प्रकाशनश्रमः सफलः स्यादिति मन्यते—

मार्गशीर्ष शु० ७
वि० सं० १९९६
रामघाट, काशी

तत्रभवतां विदुषां वशंवदः—
त्रिपाठ्युपाह्वो
दुर्गादत्तशर्मा

श्रीसामवेदीयान्हिकप्रयोगः ।

तत्रादौ उपवीतकरणप्रयोगः ।

तत्र अनध्यायवर्जितेऽहनि स्वाध्याये प्रातः स्नातः सन्ध्याहोमादिकं विधाय, अभुञानो मध्यान्हादर्वाग् द्विजस्त्री निर्मितं द्विजनिर्मितं वा सूत्रं प्रक्षालितपाणिपाद आचान्तः शुचौ देशे प्राङ्मुख उदङ्मुखो वा उपविश्य, वामहस्तस्याङ्गुष्ठवर्जिता अङ्गुलयः संहताः सरलाः कृत्वा, दक्षिणहस्तेन सूत्रं समादाय, सूत्रोत्पादने ब्रह्माणं ध्यात्वा, अङ्गुलीनां मूले षण्णवतिसंख्यया आवेष्टय, त्रिगुणीकरणे विष्णुं ध्यात्वा, तदेव यत्नतस्त्रिगुणीकृत्य, आपोहिष्ठेत्यादितिसृभिर्ऋग्भिः प्रक्षाल्य अधोवृतं बलयित्वा । तत्र मन्त्रः—(पृ० ७, पं० २)

पुनस्तत्सावित्र्या जपंस्त्रिगुणीकृत्य ऊर्ध्ववृतं बलयित्वा, उपविश्य प्रदक्षिणं त्रिरावेष्टय, ग्रन्थिबन्धने रुद्रं ध्यात्वा, स्वगोत्रोत्थप्रवर संख्यया आवृत्य दृढं बध्वा, दशकृत्वो गायत्र्याभिमन्त्रिताभिरद्भिः सम्प्रोक्षयेत् । एवं सम्पादितमुपवीतं पूर्वधृतोपवीतनाशे अधोयाते वा अन्यद्धारयेत् । तत्र धारणविधिः ।

प्रक्षालितपाणिपादः प्राङ्मुख उदङ्मुखो वा उपविश्याचम्य, हस्ताभ्यामुपवीतमादाय, हरिब्रह्मेश्वरान्स्मृत्वा, गायत्र्याभिमन्त्र्य, धारणमन्त्रस्य ऋष्यादीन्स्मृत्वा, यज्ञोपवीतमसीति मन्त्रेण व्याहृत्या वा यज्ञोपवीतं परमामित्यादिना वा दक्षिणहस्तप्रवेशपूर्वव

दक्षिणहस्तेनैव शिरोपरि नीत्वा, वामांसे स्थापयेत् । एवमन्यान्युपवीतानि मन्त्रवत्परिधाय द्विराचामेत् । अस्मदेशीयास्तु यज्ञोपवीतमसीति मन्त्रेण परिधाय—

ॐ यज्ञोपवीतमसि यज्ञस्य त्वा उपवीतेनोपनह्यामि ॥ १ ॥

आचम्य यज्ञोपवीतं परमं इति पश्चात् पठन्ति ।

ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥१॥

विनष्टमधोयातमुपवीतं अप्सु प्रक्षिपेत् ।
मेखलामजिनं दण्डमुपवीतं कमण्डलुम् ।
अप्सु प्रास्येद्विनष्टानि गृहीतान्यानि मन्त्रत ॥ इति मनुवाक्यात् ॥

स्वधृतोपवीतनाशे परधृतमुपवीतं न धार्य्यम् ।
उपानहौ च वस्त्रं च धृतमन्यैर्न धारयेत् ।
उपवीतमलङ्कारं स्रजं करकमेव च ॥ इति मनूक्तेः ।

इत्युपवीतकरणप्रयोगः ॥

अथ प्रातरादिक्रमेण आन्हिकप्रयोगः प्रारभ्यते ॥

ब्राह्मे मुहूर्त्ते उत्थाय, परमेश्वरं स्मृत्वा, रोचनादीनवलोक्य, श्रोत्रियादीन् दृष्ट्वा, नमस्कृत्य, मूत्रपुरीषोत्सर्गार्थं नैर्ऋत्यां ग्रामात्क्रमशतं नगराच्चतुर्गुणं गत्वा, वस्त्रेण सघ्राणास्यं शिरः संवेष्ट्य, अयज्ञियतृणैर्भूमिमाच्छाद्य, यज्ञोपवीतं दक्षिणकर्णेऽवलम्ब्य, ष्ठीवनोच्छ्वासरहितः सन्नहनि उदङ्मुखो; रात्रौ दक्षिणामुखो मूत्रपुरीषे कुर्यात् । ततः सकृन्मृदमादाय, लिङ्गं प्रक्षाल्य, मृदादानपूर्वकं पञ्चकृत्वो गुदं प्रक्षाल्य, दशकृत्वः सव्यहस्तं मृद्ग्रहणपूर्वक

प्रक्षाल्यैवं सप्तवारं करावामणिबन्धं प्रक्षाल्य, त्रिवारं मृदुग्रहणेन-गुल्फं पादौ प्रक्षालयेत् ॥

इति शौचविधिः ॥

अथाचमनम् ॥

(आचमनात्पूर्वं गण्डूषानाहाचार्यः—

कुर्याद्वादशगण्डूषान्पुरीषोत्सर्जने द्विजः ।
मूत्रे चत्वारि गण्डूषान्भोजनान्तेषु षोडश ॥
भक्षभोज्यावसाने तु गण्डूषाष्टौ विधियते । इति ।)

अग्निसाध्यकर्मणि तत्प्रारम्भे मध्ये वा आचमननिमित्तपातेऽग्नेरुत्तरतो गत्वा, अन्यस्मिन्कर्मणि आचमननिमित्तपाते तदुत्तरतो गत्वा, प्राङ्मुख उदङ्मुखो वा उपविश्य, जानुमध्यकृतकरोऽनुष्णाभिरफेनाभिर्दक्षिणहस्तं गोकर्णाकृतिवत्संलग्नाङ्गुलित्रयं मुक्तकनिष्ठिकं साङ्गुष्ठं कृत्वा, मार्षमित्सुवर्णमणिमज्जनमात्रमुदकमादाय वामहस्तेन दक्षिणं संस्पृश्य, अङ्गुष्ठमूलभवब्राह्मतीर्थेन त्रिराचामेत् । आचम्य सलोमभागेऽङ्गुष्ठमूलेन मुखं द्विः प्रमृज्य, पादावभ्युक्ष्य, जलान्तरेण शिरोऽभ्युक्ष्य, प्रतीन्द्रियं जलमादाय मिलित-तर्जनीमध्यमानामाभिः संवृतं मुखं संस्पृश्य, तर्जन्यङ्गुष्ठाभ्यां नासापुटे स्पृष्ट्वा, अनामिकाङ्गुष्ठाभ्यां नेत्रे संस्पृश्य, ताभ्यामेव कर्णौ स्पृष्ट्वा, कनिष्ठाङ्गुष्ठाभ्यां नाभिं संस्पृश्य, हस्ततलेन हृदयं स्पृष्ट्वा, सर्वाङ्गुलीभिः शिरः, सर्वाङ्गुल्यग्रेण बाहुमूलं स्पृशेत् । ततः किञ्चिदुदकं भूमौ स्रावयेत् । एवमाचमनं सर्वत्र ॥

इत्याचमनम् ॥

अथ दन्तधावनविधिः ॥

कण्टकीक्षीरवृक्षादिभवमष्टाङ्गुलं दन्तकाष्ठमादाय, प्राङ्मुख-ईशानादिगभिमुखो वाऽन्तर्जानुकृतकर उपविश्य, शुद्धोदकेन दन्त-काष्ठं प्रक्षाल्य ।

आयुर्बलं यशो वर्चः प्रजां पशून् वसूनि च ।
ब्रह्म प्रज्ञां च मेधां च त्वं नो धेहि वनस्पते ॥

इति मन्त्रेणाभिमन्त्र्य, वाग्यतोऽग्रेण पर्वार्द्धमितं कूर्चं कृत्वा, दन्तान्संघृष्य, जिह्वामुल्लिख्य, पुनस्तत्काष्ठं प्रक्षाल्य, भङ्क्त्वोत्सृजेत् । ततो मुखशुद्ध्यर्थं गण्डूषान्कृत्वा, मुखनासाक्षीणि मलापकर्षणपूर्वकं संशोध्य, मुखं प्रक्षाल्याचम्य, सर्वेश्वरं स्मृत्वा नमस्कुर्यात् ।

इति दन्तधावनविधिः ॥

अथ प्रातः स्नानम् ॥

रात्रिधृतं वासः परित्यज्यान्यच्छुद्धं परिधाय, गृहीतमृत्कुशोदकपात्रो नद्यादौ गत्वा, प्रक्षालिताङ्घ्रिकरः शिखां बध्वा, आचम्य, पुनः प्रक्षाल्य, दर्भादीन्निधाय, नद्यां प्रवाहाभिमुखस्तडागे सूर्याभिमुखस्तूष्णीं स्नात्वा, द्विराचम्य, बहिर्जलसमीप उपविश्य, कुशपाणि देशकालौ सङ्कीर्त्य 'श्रीपरमेश्वरप्रीतये प्रातःस्नानमहं करिष्ये' इति सङ्कल्प्य मृत्तिकामादाय, इदं विष्णुरित्यादिशण्मन्त्रेण अभिमन्त्र्य मस्तकाद्यङ्गेषु तां मृदमालिप्य ।

३२उ ३ १ २ ३ १— ३२ ३ २ १ २
ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य
३ २
पाꣳसुले ॥ १ ॥

१ २ ३ १— २२ ३ १ २ ३ १— २२ २ ३ १ २
त्रीणि पदा विचक्रमे विष्णु गोपा अदाभ्यः । अतो धर्माणि
३ १ २
धारयन् ॥ २ ॥

२ ३ १ २ ३ १ २ ३ १ २ ३ २ १ २ ३ २ ३
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः
१ २
सखा ॥ ३ ॥

१— २२ ३ २ ३ १— २२ ३ १ २ ३ २ ३ २ ३
तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षु-
१ २
राततम् ॥ ४ ॥

१— २२ ३ १ २ ३ २ २ १ २ २ ३ १ २ ३ २
तद्विप्रासो विपन्युवो जागृवाꣳसः समिन्धते । विष्णोर्यत्परमं
३ २
पदम् ॥ ५ ॥

१ २ २ १ २ ३ २ ३ १ २ ३ २ ३ २ ३ ४
अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे । पृथिव्या अधि
१ २
सानवि ॥ ६ ॥

आपोहिष्ठेत्यादि तिसृभिर्ऋग्भिर्मार्जयित्वा । (पृ० १३ पं० २)

अन्तर्जले ऋतञ्चेत्यघमर्षणं कृत्वा ।

ऋतञ्चेत्यघर्षणोऽनुष्टुप् भाववृतः अघमर्षणे विनियोगः
(पृ० ८ पं० १२)

स्नात्वा पुनरापोहिष्ठेत्यादिभिर्मार्जयित्वा, आचम्य कुशोदकेन स्नानाङ्गतर्पणं कुर्यात् । यथा—

ॐब्रह्मादयो देवास्तृप्यन्तु । देवपत्न्यस्तृप्यन्तु । देवसुतास्तृप्यन्तु । देवगणास्तृप्यन्तु ॥ गौतमादय ऋषयस्तृप्यन्तु । ऋषिपत्न्य० । ऋषिसुतास्तृ० ऋषिगणा० ।

अपसव्येन द्विगुणदर्भैः—

कव्यवालादयः पितरस्तृप्यन्तु । पितृपत्न्यस्तृप्यन्तु । पितृसुताः० । पितृगणाः० ।

निवीती कुशमध्यैः ।

सनकादयो मनुष्यास्तृप्यन्तु । मनुष्यपत्न्यः० । मनुष्यसुताः० । मनुष्यगणाः० ।

एवं सन्तर्प्य सव्येन यक्ष्माणं तर्पयेत् । तत्र मन्त्रः—

यन्मया दूषितं तोयं मलैः शारीरसम्भवैः ।

तस्य पापस्य शुद्ध्यर्थं यक्ष्माणं तर्पयाम्यहम् ॥

तत आचम्य, धौते वाससी परिधायाचम्य, कृततिलकः शुद्धासने उपविश्य सन्ध्यां कुर्यात् ।

इतिप्रातःस्नानम् ।

अथ प्रातःसन्ध्या ।

तत्र सव्यहस्ते कुशत्रयं दक्षिणहस्ते कुशद्वयं धृत्वा आचम्य 'मम उपात्तदुरितक्षयार्थं ब्रह्मवर्चसकामार्थं प्रातःसन्ध्योपासनमहं करिष्ये' इति सङ्कल्प्य, दक्षिणहस्तेन जलमादाय, प्रदक्षिणं परितः सिञ्चन्नात्मरक्षां कुर्यात् । ततः ऋष्यादीन् संस्मृत्य मार्जनं कुर्यात् । ॐकारस्य ब्रह्मा ऋषिः दैवी गायत्री छन्दः अग्निर्देवता सर्वकर्मारम्भे विनियोगः । व्याहृतीनां विश्वामित्र-जमदग्नि-भरद्वाजा गायत्र्युष्णिगनुष्टुबग्निवायुसूर्याः, तत्सवितुर्विश्वामित्रो गायत्री सविता, आपोहिष्ठेति तिसृणां सिन्धुद्वीपो गायत्र्यापः मार्जने विनियोगः । ततो दक्षिणहस्ते कुशत्रयमादाय, नद्यादौ जलाशयस्थं

स्थले पात्रस्थं वामहस्तस्थं वा कुशाग्रैर्जलमादाय, मार्जनं कुर्यात् ।

ॐभूर्भुवःस्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । ॐआपो हि ष्ठा मयो भुवः । ॐता न ऊर्जे दधातन । ॐ महे रणाय चक्षसे । ॐ यो वः शिवतमो रसः । ॐ तस्य भाजयते हनः । ॐ उशतीरिव मातरः । ॐ तस्मा अरङ्गमामवो । ॐ यस्य क्षयाय जिन्वथ । ॐ आपो जनयथा च नः ।

एभिर्मन्त्रैः शिरसि मार्जनं कृत्वा ध्यानावाहने कुर्यात् ।

पूर्वा सन्ध्या तु गायत्री रक्ताङ्गी रक्तवाससा ।
अक्षसूत्रधरा देवी कमण्डलुसमन्विता ॥
हंसस्कन्धसमारूढा तथा च ब्रह्मदैवता ।
कुमारी ऋग्वेदमुखी ब्रह्मणा सह आवह ॥
आयाहि वरदे देवि त्र्यक्षरे ब्रह्मवादिनि ।
गायत्रि च्छन्दसां मातर्ब्रह्मयोने नमोऽस्तु ते ॥

ततः प्राणायामः । भूरादीनां विश्वामित्र—जमदग्नि—भरद्वाज गौतमाऽत्रिवसिष्ठ—कश्यपाः गायत्र्युष्णिगनुष्टुप्बृहतीपङ्क्ति त्रिष्टुब्जगत्योऽग्निवायु—सूर्य—बृहस्पतिवरुणेन्द्रविश्वेदेवाः, तत्सवितुर्विश्वामित्रो गायत्री सविता, आपो ज्योतिः प्रजापतिर्यजुर्ब्रह्माग्निवायुसूर्याः प्राणायामे विनियोगः । ततोऽङ्गुष्ठतर्जनीभ्यां नासापुटद्वयं धृत्वा, मुखनासासञ्चारिणं वायुं निरुन्ध्य, मनसा भूरादि जपन्प्राणायामं कुर्यात् ।

ॐ भूः ॐभुवः ॐस्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । ॐ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् ।

एवं त्रिरावृत्त्या एकः प्राणायामः । इत्थं प्राणायामत्रयं कृत्वा आचमनं कुर्यात् ।

सूर्यश्चेति नारायण ऋषिः प्रकृतिश्छन्दः सूर्यो देवता आचमने विनियोगः । ततो हस्ते जलमादाय ।

ॐसूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां यद्राज्या पापमकारिषं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु यत्किञ्च दुरितं मयि इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा । इति मन्त्रेणाचम्य तूष्णीं द्विराचामेत् ।

ततोऽञ्जलिप्रक्षेपः । हस्तेनैकेन जलमादाय, ऋतञ्चेयमर्षणोऽनुष्टुब्भावदृतः अश्वमेधावभृथे विनियोगः ।

ॐ ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत ।
ततो रात्र्यजायत ततः समुद्रो अर्णवः ॥
समुद्रादर्णवादधि संवत्सरो अजायत ।
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥
सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।
दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः ॥

इमं मन्त्रमायतासुः सकृदनायतासुर्वा त्रिः पठित्वा, जलं प्रक्षिप्योत्थाय, हस्ताभ्यां जलमादाय, सप्रणवव्याहृतिकां गायत्रीमुच्चार्य सूर्याभिमुखोऽञ्जलित्रयं प्रक्षिपेत् ।

ततः प्रदक्षिणमावृत्त्याचम्य, स्वस्तिकाकृतिकृतहस्तः सूर्यमुपतिष्ठेत् । उदुत्यं प्रस्कण्वो गायत्री सूर्यः, चित्रङ्कुत्सस्त्रिष्टुप् सूर्यः उपस्थाने विनियोगः ।

ॐ उदुत्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम् ॥१॥

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याऽग्नेः । आ प्राद्यावापृथिवी अन्तरिक्ष ५ सूर्य आत्मा जगतस्तस्थुषश्च ॥ २ ॥

ततः प्रणवव्याहृतिगायत्रीणामृष्यादीन्पूर्ववत्स्मृत्वा 'जपे विनियोगः' इत्युक्त्वा, करमालया नाभौ उत्तानधृतकरो मौनी प्रणवव्याहृतियुतां गायत्रीमष्टोत्तरशतमष्टाविंशति वा सञ्जप्य सङ्कल्पं कुर्यात् । 'अनेन गायत्र्या मत्कृतेन जाप्येन ब्रह्मात्मा रविः प्रीयताम्' । ततः—

उत्तरे शिखरे जाता भूम्यां पर्वतवासिनी ।
ब्रह्मणा समनुज्ञाता गच्छ देवि यथासुखम् ॥

इति विसृज्य द्विराचामेत् ॥

इति प्रातःसन्ध्या ॥

अथ माध्यान्हिकस्नानविधिः ॥

तत्र स्नानार्थं नद्यादौ गत्वा जलेन तटं संशोध्य मृद्गोमय तिलकुशाक्षतानुपकल्प्य तडागञ्चेत्तडागात्पञ्च मृत्पिण्डान्बहिर्निःक्षिपेत् । ततः पावकान इत्यस्य मधुच्छन्दा ऋषिः गायत्री छन्दः सरस्वती देवता तीर्थनमस्करणे वि० ।

३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २
ॐ पावकानः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥

इति मन्त्रेण 'तीर्थदेवताभ्यो नमः' इति नमस्कृत्य । मृज्जलाभ्यां पादावारभ्य गात्राणि प्रक्षालयेत् । तत्र वामहस्तेन पादौ । ततो लिङ्गम् । ततो गुदम् । ततो हस्तौ । ततो दक्षिणहस्तेन कुक्षौ हृदयं

शिरश्च प्रक्षाल्य, निमज्य तीरं आगत्योपविश्य । मा नस्तोक इति कुत्सो जगती रुद्रः शिखाबन्धने वि० ।

ॐ मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः ।

वीरान्मा नो रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ।

इति मन्त्रेण वामपार्श्वे शिखां बध्वा । यज्ञोपवीती कुशहस्तः प्राङ्मुख उदङ्मुखो वा उपविश्याचम्य देशकालौ च सङ्कीर्तयित्वा 'सकलपापक्षयकामः परमेश्वरप्रीतये अस्यां नद्यां अस्मिन्तडागे वा स्नानमहं करिष्ये' इति सङ्कल्प्य । ततो जलं दक्षिणहस्तेनादाय । सप्तव्याहृतीनां विश्वामित्रजमदग्निभरद्वाजगौतमाऽत्रिवसिष्ठकश्यपा ऋषयः, गायत्र्युष्णिगनुष्टुब्बृहतीपाङ्क्तित्रिष्टुब्जगत्यश्छन्दांसि, अग्निवायुसूर्यबृहस्पतिवरुणेन्द्रविश्वेदेवा देवताः जलाभिमन्त्रणे वि० । इति ऋष्यादिकं स्मृत्वा "ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं" इति सप्त व्याहृतयः सप्तकृत्वः सञ्जप्य । ततो गायत्र्या विश्वामित्रो गायत्री सविता देवता जलाभिमन्त्रणे वि० । ॐ तत्सवितुर्वरेण्यमिति सकृद्गायत्र्या चाभिमन्त्रितजलेन आचम्य ततस्तूष्णीं द्विराचामेत् । ततः परमेश्वरं वरुणं च स्मृत्वा(१) ततः

(१) अत्र समाचारात् यदाकर्देति ऋचं पठित्वा नमस्कुर्वन्ति । तद्यथा--यदाकर्देति वसिष्ठो बृहती वरुणः स्मरणे वि० ।

३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २　　१ २ ३　　३ १ २

ॐ यदा कदा च मीदुषे स्तोता जरेत मर्त्यः । आदिद्वन्देत वरुणं

३ २ ३ २ २ ३ १ २

विपा गिरा धर्तारं विव्रतानाम् ॥ १ ॥

सहस्रशीर्षाघृतवत्यश्वक्रान्तेति मन्त्रत्रयान्ते मृत्तिकामादाय, सहस्रशीर्षेति नारायणोऽनुष्टुप्पुरुषः, घृतवतीति मन्त्रस्य भरद्वाज-ऋषिः जगती छन्दः द्यावापृथिव्यौ देवते, अश्वक्रान्तेति वामदेव-ऋषिरनुष्टुप्छन्दः मृत्तिका देवता मृत्तिकाग्रहणे वि० ।

३१२ ३ १२ ३ २ ३१२

ॐ सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात् ।

१— २२ २१२ २१ २ ३२

स भूमिꣳ सर्वतो वृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥

३१२ ३ १२ ३ २ ३ २ ३ १ २ ३ १२ ३१२

ॐ घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधु दुघे सुपेशसा ।

३ २ २ १—२२ ३ १ २ ३ १ २ ३२३१२

द्यावा पृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा॥२॥

ॐ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ।

मृत्तिके हर मे पापं यन्मया पूर्वसञ्चितम् ।

त्वया हृतेन पापेन सर्वपापैः प्रमुच्यते ॥ ३ ॥

एभिर्मन्त्रैः मृत्तिकामादाय । इदं विष्णुरिति षण्णां मेधातिथि-र्गायत्री विष्णुः मृत्तिकासमूहने वि० ।

२२उ ३ १ २ ३ १— २२ ३२

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्

१२ ३२

समूढमस्य पाꣳसुले ॥ १ ॥

१ २ ३ १— २२ ३ १ २ ३ १— २

त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः

२ ३ १ २ ३१२

अतो धर्माणि धारयन् ॥ २ ॥

२ ३ १ २ ३ १ २ ३ १ २ ३२

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ।

१ २ ३ २ ३ १ २

इन्द्रस्य युज्यः सखा ॥ ३ ॥

१— २१ ३१ ३१— २१ ३१२
तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः ।
३२३ २३१२
दिवीव चक्षुराततम् ॥ ४ ॥
१२ २१ ३ २ ३१ ३ १२

तद्विप्रासो विपन्युवो जागृवाꣳ सः समिन्धते ।
२ ३१२३२ ३२
विष्णोर्यत्परमं पदम् ॥ ५ ॥
१२३१ २ ३ २३१२ ३२
अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे ।
३ २उ ३ १२
पृथिव्या अधि सानवि ॥ ६ ॥

इति षड्भिर्मन्त्रैर्जलेन तां मृदं आलोड़येत् ।

तत उद्वयन्तेति प्रस्कण्व ऋषिः पङ्क्तिश्छन्दः सूर्यो देवता । उदुत्तममिति शुनःशेपस्त्रिष्टुप् वरुणादित्यौ सूर्यावेक्षणे वि० ।

ॐ उद्वयन्तमसस्परि ज्योतिः पश्यन्त उत्तरꣳस्वः पश्यन्त उत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ १ ॥
१२३१ २ ३ १ २३१—२१ ३१— २१३१ २
ॐ उदुत्तमं वरुणपाशमस्मदवा धमं विमध्यमꣳश्रथाय ।
१ २ ३ १— २१३ २३ १ २
अथादित्य व्रते वयं तवानागसो अदितये स्याम ॥ २ ॥

एवं ऊर्ध्वौ पाणी कृत्वा उभाभ्यां मन्त्राभ्यां आदित्यं विलोकयेत् । तत उद्धृतासीति वामदेवोऽनुष्टुप् पृथिवी, अमोसीति प्रजापतिस्त्रिष्टुबिन्द्रः मृदालेपने वि० ।

ॐ उद्धृतासि वराहेण कृष्णेन शतबाहुना ।
मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिवन्दिता ॥ १ ॥

ॐ अमोसि प्राण तद्दतं ब्रवीम्यमाह्यसि सर्वमनुप्रविष्टः ।

स मे जरां रोगमपमृज्य शरीरादपाम एधि मा मृथान इन्द्र ॥२॥

आभ्यां मन्त्राभ्यां तया मृदा शिरःस्कन्धपार्श्वोरुजङ्घाङ्घ्रिषु प्रातिलोम्येन विलिम्पेत्। पुनरनेनैव विधिना मृत्तिकाग्रहणाद्यन्त-स्पर्शनान्तं कुर्यात् ।

ततो गोमयेन । गावश्चिदिति सौभरिः ककुबुष्णिक् मरुतः (१)गोमयलेपने विनि० ।

१२ ३क २२ ३२३ १२ ३१२

ॐ गावश्चिद्घासमन्यवः सजात्येन मरुतः सबन्धवः । रिहते ३१२ ३२

ककुभो मिथः ॥ १ ॥

ततो ऋतञ्चेत्यघर्षणोऽनुष्टुप् भाववृतः अघमर्षणे विनियोगः। तर्जन्यङ्गुष्ठाभ्यां नासापुटे वायुनिरोधाय संगृह्य, ऋतञ्च सत्य-श्चेति त्रिः पठेत् ।

ॐ ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत । ततो रात्र्यजा-यत ततः समुद्रो अर्णवः । समुद्रादर्णवादधि सम्वत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः ॥ १ ॥

---

(१) अस्याग्रे सदागावमानस्तोके इति मन्त्रद्वयमप्याचारात् पठ-न्ति । तयोर्ऋष्यादयो यथा–"सदागाव इति वाक्पाङ्क्तिर्वाक् , मानस्तोक इति कुत्सो जगती रुद्रः"इति । ततो गावश्चिदिति मन्त्रान्ते—

२३ २२ १२ ३१ २ ३ १२३१२३१२

ॐ सदा गावः शुचयो विश्वधायसः सदा देवा अरेपसः ॥ १ ॥

ॐ मानस्तोके तनये मान आयौ मानो गोषु मानो अश्वेषु रीरिषः। वीरान्मानो रुद्रभामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे॥ इति ॥२॥

ततोऽभिमतदेवतां स्मृत्वा, नाभिमात्रं जलं प्रविश्य, वक्ष्यमाणाभिर्ऋग्भिः कुशैर्मार्जयेत् । शन्नो देवीति सिन्धुद्वीपो गायत्र्यापः, आपोहिष्ठेति तिसृणां सिन्धुद्वीपो गायत्र्यापः, उपास्मा इत्यादि सामत्रयस्य असितकश्यपवैखानसा गायत्री सोमः, तरत्समन्दीत्यवत्सारो गायत्री सोमः, एतोन्विन्द्रेति तिसृणां तिरश्च्यनुष्टुबिन्द्रः, तमुष्टवामेति तिरश्च्यनुष्टुबिन्द्रः, नकिरिन्द्रेति वामदेवो गायत्रीन्द्रः, पवित्रन्त इति तिसृणां पवित्रो जगती सोमः मार्जने विनियोगः ॥

ततः शन्नोदेव्यापोहिष्ठादिभिस्तिसृभिरुपास्मा इत्यादि नवभिस्तरत्समन्दीत्यादिचतुर्भिरेतोन्विन्द्रेति तिसृभिस्तमुष्टवाम नकिरिन्द्र पवित्रन्तेति तिसृभिर्ऋग्भिः प्रत्यृचमृगन्ते मार्जयेत् ।

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १
ॐ शन्नो देवी रभिष्टये शन्नो भवन्तु पीतये । शंयोरभि
२
स्रवन्तु नः ॥ १ ॥

२ ३ १— २१ ३ २ ३ १ २ ३ १ २ ३१—२१ ३ १ २
ॐ आपोहिष्ठा मयोभुवस्ता न ऊर्जे दधातन। महेरणाय चक्षसे॥२॥

१ २ ३ १ २ ३ २ ३ १ २ ३१ २ ३ १ २ ३ १ २
यो वः शिवतमो रसस्तस्य भाजयतेहनः। उशतीरिव मातरः॥३॥

२ ३ १ २ ३ २ ३ १ २ ३ १ २ १ २ ३ १
तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ । आपो जन
ा च नः ॥ ४ ॥

१ २ ३ १ २ ३ १ २ ३ २ ३ १२ २१
ॐ उपास्मै गायता नरः पवमानायेन्दवे। अभिदेवाꣳ इयक्षते ।५।

२ ३ १ २ ३ १२ २१ ३ २ ३ १ २ ३ २
भिते मधुना पयोथर्वाणो अशिश्रयुः । देवं देवाय देवयु ॥६॥

१ २ ३ २उ ३ २र २र३ १र २र १ २ ३ १ २
स नः पवस्व शङ्गवे शञ्जनाय शमर्वते। शꣳ राजन्नोषधीभ्यः॥७॥
१ २ ३ १ २ ३ १ २ ३ २ १ २ ३ १र २र
दविद्युतत्या रुचा परिष्टोभन्त्याकृपा। सोमाः शुक्रा गवा शिरः॥ ८॥
३ १ २ ३ १ २ ३ १र २र ३क २र १ २ ३ १ २
हिन्वानो हेतृभिर्हित आवाजं वाज्यक्रमीत्। सीदन्तो वनुषो यथा॥ ९॥
३ १ २ ३ १ २ ३ २ ३ १ २ १ २ ३ १ २
ऋधक्सोम स्वस्तये सञ्जग्मानो दिवा कवे। पवस्व सूर्यो दृशे॥ १०॥
१ २ ३ २ ३ १ २ १ २ ३ १ २ ३ १ २
पवमानस्य ते कवे वाजिन्त्सर्गा असृक्षत। अर्वन्तो न श्रवस्यवः॥ ११॥
२ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २ १ २ ३ १ २
अच्छाकोशं मधुश्चुतमस्रग्रं वारे अव्यये। अवावशन्त धीतयः १२
१ २ ३ २उ ३ २ ३ २ ३ २ ३ १ २ १ २ ३ २ ३
अच्छा समुद्रमिन्दवोऽस्तं गावो न धेनवः। अग्मन्नृतस्य योनिमा॥ १३॥
२ ३ २ ३ १ २ ३ १ २ ३ १— २र २ ३ २ ३ १
तरत्समन्दी धावति धारा सुतस्यान्धसः। तरत्समन्दी धावति॥ १४॥
३ १ २ ३ १ २ ३ १ २ ३ १ २ २ ३ २ ३ १ २
उस्रा वेद वसूनां मर्तस्य देव्यवसः। तरत्समन्दी धावति॥ १५॥
३ १ २ ३ २ ३ २ ३ १ २ २ ३ २ ३ १ २
ध्वस्रयोः पुरुषन्त्योरा सहस्राणि दद्महे। तरत्समन्दी धावति १६
१— २र ३ २ ३ १ २ ३ १ २ ३ १ २ २ ३ २ ३ १
आययोस्त्रिꣳशतन्तना सहस्राणि च दद्महे। तरत्समन्दी धावति॥ १७॥

२ ३ २ ३ १ २ ३ २ ३ २ २ १ २
एतोन्विन्द्रꣳ स्तवाम शुद्धꣳ शुद्धेन साम्ना ।
२ २ ३ १ २ ३ १ २ ३ २ ३ १ २
शुद्धैरुक्थैर्वा वृध्वाꣳ सꣳ शुद्धैराशीर्वान्ममत्तु ॥ १८ ॥
१ २ ३ २ ३ १ २ २ २ ३ १ २ ३ १२
इन्द्र शुद्धो न आगहि शुद्धः शुद्धाभिरूतिभिः ।
३ २ २ १— २२ २ १ २
शुद्धो रयिं नि धारय शुद्धो ममद्धि सोम्य ॥ १९ ॥
१ २ ३ १— २२ ३ २ ३ १— २२ ३ १ २
इन्द्र शुद्धो हि नो रयिꣳ शुद्धो रत्नानि दाशुषे ।
३ २ ३ १ २ ३ १— २२
शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजꣳ सिषाससि ॥ २० ॥
१२ ३ २ ३ २ १ २ ३ १ २ ३ २
तमुष्टवाम यं गिर इन्द्रमुक्थानि वावृधुः ।
३ १ २ ३ २ ३ १ २
पुरूण्यस्य पौꣳस्या सिषा सन्तो वनामहे ॥ २१ ॥
१ २ ३ १—२२३ १— २२ २ ३ २ ३
नकिꣳ इन्द्रत्वदुत्तरं नज्यायो अस्ति वृत्रहन् । नक्षेवं
३ २
यथा त्वम् ॥ २२ ॥
३ १ २ ३ १ २ ३ १— २२ ३ १ २ ३ १ २
पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
१ २ ३ २ ३ ३ १ २ ३ २ ३ १—२२ ३ १— २२
अतप्ततनूर्नतदामो अश्नुते शृतास इद्वहन्तः सन्तदाशत ॥२३॥
१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ क २२
तपोष्पवित्रं विततं दिवस्पदेऽर्चन्तो अस्य तन्तवो व्यस्थिरन् ।
१ २ ३ १ २ ३ १ २ ३ २ ३ १— २२ ३
अवन्त्यस्य पविता रमाशवो दिवः पृष्ठमधिरोहन्ति
१ २
तेजसा ॥ २४ ॥
१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २
अरूरुचदुषसः पृश्निरग्रिय उक्षा मिमेति भुवनेषु वाजयुः ।

३ १ २ ३ १ २ ३ १ २ ३ २ ३ १
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा
दधुः ॥ २९ ॥

ततः ॐ भूः पुनातु । ॐ भुवः पुनातु । ॐ स्वः पुनातु । ॐ भूर्भुवः स्वः पुनात्विति समाचारान्मार्जयेत् ॥

ततो भूरादिभिस्त्रिः प्राणायामं कृत्वा, त्रिर्निमज्य । सहस्रशीर्षेत्यादि तिसृणां नारायणोऽनुष्टुप् पुरुषः अघमर्षणे विनियोगः ।

३ १ २ ३ १ २ ३ २ ३ १ २
ॐ सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात् ।
१ २ ३ १ २ ३ १ २ ३ २
स भूमिं ९सर्वतो वृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥
३ २ ३ २ ३ ३ १ २ ३ १ २ ३ १ २
त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहा भवत्पुनः ।
२ ३ २ ३ २ ३ २ ३ २
तथा विश्व९ व्यक्रामदशनानशने अभि ॥ २ ॥
१ २ ३ २ ३ ३ २ ३ २ ३ १ २
पुरुष एवेद९ सर्वं यद्भूतं यच्च भाव्यम् ।
१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥

एतदृक्त्रयं प्राणायामत्रयद्वायुं निरुन्धयन् जलमग्ननासा सञ्जप्य पुनस्त्रिर्निमज्याचम्य, शन्नोदेव्यादिभिर्मन्त्रैः पुनर्मार्जयित्वा, स्नानाङ्गतर्पणं कुशोदकैः पूर्ववत् कुर्यात् । ततो जलाद्बहिर्निर्गत्याचम्य, कृततिलको मध्याह्नसन्ध्यां कुर्यात् ।

इति स्नानविधिः ।

अथ मध्याह्न-सन्ध्या ॥

तत्र प्रातःसन्ध्यावत्सर्वम् । विशेषो यथा-'मध्याह्नसन्ध्यो पासनमहं करिष्ये' इति सङ्कल्पे ॥

मध्यान्हे वै तु या सन्ध्या श्वेताङ्गी श्वेतवाससा ।
वृषस्कन्धसमारूढा तथा च रुद्रदैवता ॥ १ ॥
युवा यजुर्वेदमुखी रुद्रेण सह आवह ।
आयाहि वरदे देवि त्र्यक्षरे रुद्रवादिनि ॥ २ ॥
सावित्रि च्छन्दसां माता रुद्रयोने नमोऽस्तु ते ॥

इत्यावाहनम् । ततः प्राणायामः पूर्ववत् । आचमनं-आपः पुनन्त्विति वामदेवोऽनुष्टुबाप आचमने विनियोगः ।

ॐ आपः पुनन्तु पृथिवीं पृथ्वी पूता पुनातु माम् ।
पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम् ॥
यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम ।
सर्वं पुनन्तु मामापोऽसताञ्च प्रतिग्रहं स्वाहा ॥

अनेनाचम्य तूष्णीं द्विराचम्य । ऋतञ्च सत्यञ्चेत्यनेनाघमर्षणान्तं पूर्ववत् । तत उत्थाय, सूर्याभिमुखो गायत्र्यैकाञ्जलिं क्षेप्य, प्रदक्षिणं कृत्वा, आचम्य सूर्यमुपतिष्ठेत् ।

भूम्यलग्नपादद्वयगुल्फ, एकपादस्थो वा एकपादेनाप्यर्द्धपादस्थो वा उर्द्ध्वबाहुरुदुत्यं चित्रन्देवानामिति ऋग्द्वयोपस्थानानन्तरं विभ्राट् बृहतिपवित्रेत्यादि इच्छया जपेद्यावदशतिसमाप्तिरर्वाग् वा । विभ्राडिति सूर्यो जगती सूर्यः, चित्रं कुत्सो जगती (त्रिष्टुप्) सूर्यः, आयङ्गौरिति तिसृणां सर्पा गायत्री सूर्यः'

अपत्येता इत्याद्यष्टर्चस्य प्रस्कण्वो गायत्री सूर्यः उपस्थाने विनियोगः ।

२ ३ २ ३ १२ ३ १ २ ३ १ २ ३ १— २२ ३ १ २
ॐ उदुत्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् १

३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १२ ३ २
ॐ चित्रं देवाना मुदगादनीकं चक्षुर्मित्रस्य वरुणस्याऽग्नेः ।

२ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १— २२ ३ १
आप्राद्यावा पृथिवी अन्तरिक्ष; सूर्य आत्मा जगतस्तस्थु-
२
षश्च ॥ २ ॥

३ २ ३ १ २ ३ २उ ३ १ २ ३ १ २ ३ १ २
ॐ विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविंहुतम् ।

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १— २२
वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा विरा-
जति ॥ ३ ॥

३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ २
चित्रं देवाना मुदगादनीकञ्चक्षुर्मित्रस्य वरुणस्याऽग्नेः ।

२ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १— २२ ३ १
आ प्राद्यावा पृथिवी अन्तरिक्ष; सूर्य आत्मा जगतस्तस्थु-
२
षश्च ॥ ४ ॥

१— २२ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १
आयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरञ्च प्रय-
२
न्त्स्वः ॥ ५ ॥

३ १ २ ३ २उ ३ १ २ ३ २ १ २ २ ३ १—
अन्तश्चरति रोचनास्य प्राणादपानती । व्यख्यन्महिषो
२२
दिवम् ॥ ६ ॥

३ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३
त्रिःशद्धाम विराजति वाक्पतङ्गाय धीयते । प्रतिवस्तो
२ ३ १ २
रहद्युभिः ॥ ७ ॥

२ ३ २ ३ १ २ ३ १ २ ३ १ २ १ २ ३ १
अपत्येता यवो यथा नक्षत्रायन्त्यक्तुभिः । सूराय विश्व-
२
चक्षसे ॥ ८ ॥

१ २ ३ २ ३ २ ३ २ ३ २ ३ १ २ १ २ ३ १
अदश्रन्नस्य केतवो विरश्मयो जना अनु । भ्राजन्तो अग्न-
२
यो यथा ॥ ९ ॥

३ १ २ ३ १ २ ३ १ २ २ ३ १ २
तरणिर्विश्वदर्षतो ज्योतिष्कृदसि सूर्य । विश्वमाभासि रो-
३ २
चनम् ॥ १० ॥

३ २ ३ २ ३ १ २ ३ १— २ २ ३ १ २ २ २ ३ ३ क
प्रत्यङ्देवानां विशः प्रत्यङ्ङुदेषि मानुषान् । प्रत्यङ्विश्वं स्व-
२ २ ३ २
र्दृशे ॥ ११ ॥

१ २ ३ १ २ ३ २ ३ २ ३ १ २ १ २ ३ १
येना पावक चक्षसा भुरण्यन्तञ्जना अनु । त्वं वरुण प-
२
श्यसि ॥ १२ ॥

१— २ २ ३ १ २ ३ २ ३ १ २ ३ १ २ २ ३ १ २
उद्यामेषि रजः पृथ्वहा मिमानो अक्तुभिः । पश्यञ्जन्मानि सूर्य ॥ १३ ॥

१ २ ३ २ ३ २ ३ २ ३ १ २ ३ क २ १ २ ३ १
अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः । ताभिर्याति स्व-
२
युक्तिभिः ॥ १४ ॥

३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
सप्त त्वा हरितो रथे वहन्ति देव सूर्य । शोचिष्केशं वि-
चक्षण ॥ १५ ॥

सूर्यमुपस्थाय तर्पणं कुर्यात् । प्राङ्मुखः पातितदक्षिणजानुर्दक्षिणहस्ते धृतकुशत्रयः शुक्लैस्तिलैः कुशाग्रैर्देवतीर्थेन देवान् जलाशयात्प्रादेशमात्रहस्ताञ्जलिमुद्धृत्य तर्पयेत् ।

ॐ नमो ब्रह्मणे नमो ब्राह्मणेभ्यो नम आचार्येभ्यो नम ऋषिभ्यो नमो देवेभ्यो नमो वेदेभ्यो नमो वायवे च मृत्यवे च विष्णवे च नमो वैश्रवणाय चोपजाय च । इति कृताञ्जलिः पठित्वा अग्न्यादींस्तर्पयेत् । आदौ प्रणवमन्ते च तृप्यत्विति सर्वत्र योज्यम् । ॐ अग्निस्तृप्यतु । ॐ प्रजापति० । ॐ विश्वेदेवास्तृप्यन्तु० । ॐ ॐकार० । ॐ वषट्कारस्तृप्य० । ॐ महाव्याहृतयस्तृप्यन्तु । ॐ गायत्री तृ० । ॐ ब्रह्मा तृ० । ॐ विष्णुस्तृ० । ॐ वेदास्तृप्यं० । ॐ देवास्तृप्यं० । ॐ ऋषयस्तृप्यं० । ॐ मुनयस्तृप्यं० । ॐ आचार्यास्तृप्यं० । ॐ पुराणानि तृप्यं० । ॐ छन्दाꣳसि तृ० । ॐ यज्ञास्तृप्य० । ॐ अध्ययनं तृ० । ॐ द्यावापृथिव्यौ तृप्येताम् । ॐ अन्तरिक्षं तृ० । ॐ अहोरात्राणि तृप्यं० । ॐ मासास्तृप्यं० । ॐ ऋतवस्तृप्यं० । ॐ संवत्सरस्तृ० । ॐ वरुणस्तृ० । ॐ समुद्रास्तृप्यं० । ॐ नद्यस्तृ० । ॐ गिरयस्तृप्यं० । ॐ क्षेत्राणि तृप्यं० । ॐ वनानि तृ० । ॐ ओषधयस्तृप्यं० । ॐ वनस्पतयस्तृप्यं० । ॐ पशवस्तृप्यं० । ॐ नागास्तृप्यं० । ॐ उरगास्तृप्यं० । ॐ सुपर्णास्तृ० ॐ वयाꣳसि तृ० । ॐ गावस्तृप्यं० । ॐ वसवस्तृप्यं० । ॐ रुद्रास्तृप्यन्तु । ॐ आदित्यास्तृ० । ॐ मरुतस्तृ० । ॐ सिद्धास्तृ० । ॐ साध्यास्तृ० । ॐ गन्धर्वास्तृ० । ॐ पिशाचास्तृ० । ॐ यक्षास्तृ० । ॐ रक्षाꣳसितृ० । ॐ भूतानि तृ० । ॐ नक्षत्राणि तृ० ।

ॐ अश्विनौ तृप्येताम्। ॐ अप्सरसस्तृ०। ॐ चतुर्विधभूतग्राम०। ॐ मरीचि०। ॐ अत्रि०। ॐ अङ्गिरा०। ॐ पुलस्त्य०। ॐ पुलह०। ॐ क्रतु०। ॐ प्रचेता०। ॐ वसिष्ठ०। ॐ भृगु०। ॐ नारद०। ॐ सप्तर्षयस्तृप्यं०। ॐ अरुन्धती तृ०। एवमादयः एते मे स्वस्ति कुर्वन्तु तर्पिताः स्वस्ति कुर्वन्तु तर्पिताः॥

एवमेकैकाञ्जलिना देवान्सन्तर्प्य, अपसव्येन दक्षिणाभिमुखः पातितवामजानुः पितृतीर्थेन द्विगुणदर्भैः कृष्णैस्तिलैः पितॄन्स्तर्पयेत्॥

ॐकारो महाव्याहृतयो गायत्री ब्रह्मा वेदा देवा ऋषयः पितरश्छन्दा; स्याचार्यास्तृप्यन्ताम्। एवं त्रिः।

ॐ राणायनिस्तृप्यतु। ॐ शाण्डमुग्रस्तृ०। ॐ व्यासस्तृ०। ॐ भागुरिस्तृ०। ॐ और्गुण्डिस्तृ०। ॐ गौलूगुलविस्तृ०। ॐ भानुमानौपमन्यवस्तृ०। ॐ काराटिस्तृ०। ॐ मशको गार्ग्य०। ॐ वार्षगण्य०। ॐ कौथुमिस्तृ०। ॐ शालिहोत्र०। ॐ जैमिनि०। ॥योदशैते सामगाचार्याः स्वस्ति कुर्वन्तु तर्पिताः स्वस्ति कुर्वन्तु ॥र्पिताः॥

ॐ शटिस्तृ०। ॐ भाल्लविवि० ॐ काल्लविस्तृ०। ॐ ताण्डय०। ॐ वृषाणक०। ॐ रुरुकि०। ॐ शमवाहु०। ॐ अगस्त्य०। ॐ बष्कशिरा०। ॐ हूहूस्तृ०। दशैते मे प्रवचनकर्त्तारः स्वस्ति कुर्व०॥

ॐ कव्यवालस्तृ०। ॐ नल०। ॐ सोम०। ॐ यम०। ॐ अर्यमा०। ॐ अग्निष्वात्तास्तृप्यन्तु। ॐ सोमपीथास्तृप्यं०। ॐ

बर्हिषद० । ॐ यम० । ॐ धर्मराज० । ॐ मृत्यु० । ॐ अन्तक० । ॐ वैवस्वत० । ॐ काल० । ॐ सर्वभूतक्षय० । ॐ औदुम्बर० । ॐ दध्न० । ॐ नील० । ॐ परमेष्ठी० । ॐ वृकोदरस्तृ० । ॐ चित्र० । ॐ चित्रगुप्त० ।

अथ स्वापितृन्नामगोत्रपूर्वकं प्रतिपुरुषमञ्जलित्रयेण तर्पयेत् । अमुकगोत्र अस्मत्पिताऽमुकशर्मा तृप्यतु । एवमपरयोः । गोत्रा अस्मन्माता अमुकी देवीदा तृप्यतु । एवं तर्पणप्रयोगः । प्रथमं पित्रादिकांस्त्रीन् । ततो मात्रादींस्त्रिभिस्त्रिभिः । सपत्नजननीम् । एवमेव मातामहादिकांस्त्रीन् । एकैकाञ्जलिना तत्पत्नीः । स्वपत्नीं । तनयं, तनयाम् । ततः पितृव्यमातुलपितृव्यपत्नीमातुलपत्नीभ्रातॄन्, भ्रातृपत्नीं, पितृष्वसारं मातृष्वसारं भगिनीं तासामपत्यानि तत्पतींश्च श्वशुरं श्वश्रूं गुरुं शिष्यं मित्रञ्च (आप्तांश्च) एतानेकैकाञ्जलिना तर्पयेत् ।(१)

ततः सव्येनाचम्य कण्ठावलम्बिकृतोपवीतः कुशमध्यैः प्रत्यङ्मुखः शबलैस्तिलैस्तर्पयेत् ॥

ॐ सनकस्तृ० ॥ २ ॥ ॐ सनन्दनस्तृप्य० ॥ २ ॥ ॐ सना-

---

(१) निरग्निकस्तु सर्वत्र देवपितृमनुष्यादितर्पणेषु देवादिनाम द्वितीयाविभक्त्यन्तं समुच्चार्यान्ते तर्पयामीति पदमुच्चार्य तर्पयेत्, अग्निं तर्पयामीत्यादि । कोकिलमते पितृपितामहप्रपितामहान्, मातृमातामहप्रमातामहान् प्रत्येकमञ्जलित्रयेण तर्पयेत् । स्त्रीणाञ्च सर्वत्रापितृगोत्रेण पृथक् तर्पणं, न तु सपत्नीकशब्देन । तच्च यथासंभवं अञ्जलित्रयरूपं एकाञ्जलिरूपं वा सर्वासां समानम् । इत्थञ्च तन्मते मातृत्रयमातामहत्रयस्थाने मातृमातामहप्रमातामहरूपमेकमेव त्रिकं ज्ञेयम् ।

तन० ॥२॥ ॐ कपिल० ॥ २ ॥ ॐ आसुरि० ॥२॥ ॐ वोढु०
॥ २ ॥ ॐ पञ्चशिख० ॥ २ ॥

एतानञ्जलिद्वयेन तर्पयेत् प्रत्येकम् । ततोऽपसव्येन ।

यत्र क्वचन संस्थानां क्षुत्तृष्णोपहतात्मनाम् ।
मातृवंशे मृता ये च पितृवंशे तथैव च ॥
तेषां हि दत्तमक्षय्यमिदमस्तु तिलोदकम् ॥ १ ॥

इति मन्त्रेणाञ्जलिं जलाद्बहिरुत्तरतो निःक्षिप्य, कुशांस्त्यजेन्मन्त्रेण—

येषां न पिता न भ्राता न पुत्रो नान्यगोत्रिणः ।
ते सर्वे तृप्तिमायान्तु मयोत्सृष्टैः कुशैस्तदा ॥ १ ॥

ततो—

ये चास्माकं कुले जाता अपुत्रा गोत्रिणो मृताः ।
ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥ १ ॥

इति मन्त्रेण जलाद्बहिः स्नानवस्त्रं निःपीड्याचम्य कुशांस्त्यक्त्वा, अन्यान् धृत्वा, सूर्यादिभ्योऽर्घं दद्यात् । ततो ऋष्यादीन् संस्मृत्य, शक्तश्चेत्तिष्ठन् हृदि तिर्यक्कृतकरः प्राङ्मुखो गायत्रीमष्टोत्तरशतं जप्त्वा सङ्कल्पं कुर्यात् । 'अनेन गायत्र्या मत्कृतेन जाप्येन रुद्रात्मा रविः प्रीयताम्' । "उत्तरे शिखरे जाता" इति विसर्जयेत् ।

ॐ उत्तरे शिखरे जाता भूम्यां पर्वतवासिनी ।
रुद्रेण समनुज्ञाता गच्छ देवि यथासुखम् ॥

ततो भासादि सामानि पठेत् । तेषामृष्यादयः । भासस्य

वायुर्जगती सूर्यः। दशस्तोभस्य जमदग्निस्त्रिष्टुबग्निः। उन्नयेत्यस्यादित्योऽनुष्टुबात्मा। औशनस्य उशना गायत्र्यग्निः। शुद्धाशुद्धीययोरिन्द्रोऽनुष्टुबिन्द्रः। राजनरौहिणयोरिन्द्रस्त्रिष्टुबिन्द्रः। बृहत्साम्नो भरद्वाजो बृहतीन्द्रः। रथन्तरस्य वसिष्ठो बृहतीन्द्रेशानौ। सेतुसाम्नो विशोकस्त्रिष्टुबात्मा। महानाम्नीनां प्रजापतिर्विराडिन्द्रः। पुरीषपदानां पदपङ्क्तिर्वा। महादिवाकीर्त्यस्य सूर्यो जगती सूर्यः। ज्येष्ठसाम्नां प्रजापतिस्त्रिष्टुबग्निः। देवव्रतानां देवा उत्कृती रुद्रः। पुरुषव्रतानां पुरुषोऽनुष्टुप्पञ्चानां गायत्र्यन्तिमा आत्मा। तवश्यावीयसाम्नः प्रजापतिर्विश्वामित्रो गायत्री सविता। सन्त्वाभूतानीति विश्वेदेवास्त्रिष्टुबादित्यः। उवीचित्रं देवानामन्तश्चरति आदित्यस्त्रिष्टुप् गायत्री सूर्यः। उत्तरयोरादित्यो गायत्री सूर्यः। उदुत्यं चित्रमित्यतीषङ्गस्य सूर्यस्त्रिष्टुप् गायत्री सूर्यः। सधस्थस्य इन्द्रोऽनुष्टुप् सूर्यः। मरुतां भूतेर्मरुतो गायत्री सूर्यः। सार्पराज्ञीनां प्रजापतिर्गायत्री सूर्यः। घर्मरोचनस्येन्द्रोऽनुष्टुप् सूर्यः। परिधीनामिन्द्रो गायत्री सूर्यः। ऋतुसाम्न ऋतवोऽनुष्टुप् सूर्यः। चक्षुःसाम्नो मित्रावरुणौ गायत्री सूर्यः। श्रोत्रसाम्नो मित्रावरुणौ त्रिष्टुप् गायत्री सूर्यः। शिरःसाम्न इन्द्रो गायत्रीत्रिष्टुभौ सूर्यः। जपे विनियोगः॥

२१ २ ३२ २२ ३२ २२ १ २ २

भासम्॥ हाउ २ हाउ। ओहा।२। ओ हायि। इ हौहो।३।

१ १ १ १ १ २ २ १ २ १

इहियो।२। हुम्।३। हो।३। हः५।३। इडा।३। ऋतं मे।३। हम्।३।

२ १ २ १२ २ १ २ २ २ २ २

प्रक्षस्य वृष्णो अरुषस्य नूमा २३ हाः। मनोवचो विदथा जात

१२ २ १२ २ २ २ १२ २ १२
वेदा २३ साइ । वैश्वानराय मतिर्नव्यसेशु २३ चीः । सोम इव
२ २ २१ २ २२ ३ ३२ २२ ३२ २२
पवते चारुरग्ना २३ या ३ यि । हाउ २ हाउ । ओहा ।२। ओहायि ।
१३२ २ २ १ १ १ १ २ १ २
इहौहो ।३। इहियो ।३। हुम् ।३। हो ।३। हङ् ।३। इडा ।३। क्रुतं मे
१ ३ ५२ २ १ २ २ १ २ २२
।३। हम् ।२। हा २३४। औ होवा । इहौहो । भद्रम् । इहौहो ।
१२२ १ २ २२ २ १ २ २२ १ २ २ २ १
श्रेयः । इहौहो । वामम् । इहौहो । वरम् । इहौहो । सुवम् ।
२ २२ १ २ १ २ २२ १ २ २२ १ २ २ २ २
इहौहो । अस्ति । इहौहो । अभ्राजीत् । इहौहो । ज्योतिः । अभ्रा-
२ १ २ २ १ २ १ २ १ १ १ १
जीत् । इहौहो । दीदिवः । ऐ २३। हिया हाउवा ३। भा २३४५ सू ॥१॥

२२ २ ३२ २ ३२ २२ ३२ २
दशस्तोभम् ॥ हाउ २ हाउ । ओहा ।२। ओहा । हाओवा ।३। ऊ
— — २२ १२ २ २२ २ १२
२।३। ओ २।३। हाउ वाक् ।३। आयुर्यन् ।३। ए आयुः ।३। आयुः
१ १ १ २ २ २ — १ २ २
।३। वयाः ।२। वयः । इन्द्रन्नरो नेमधिताहवा २ न्तायि । यत्पा-
२ २ — १ २ २ २ २ — २२ २
र्थायुनजतेधिया २ स्ताः । शूरो नृषाताश्रवसश्चका २ माइ । आगो-
२ २ — १ २२ २ ३२ २२ ३२ २२
मति व्रजेम जातुवा २ न्नाः । हाउ २ हाउ । ओहा । २ । ओहा ।
२ ३२ २ — — २ १२ २ २२
हाओवा ।३। उ२।३। ओ २।३। हाउ वाक् ।३। आयुर्यन् ।३। ए
२ १२ १ ३ ५२ २
आयुः ।३। आयुः ।३। वयाः ।२। वा २। या २३४। औहोवा ।
२२ २ १२ २ १ २ २ २ २ ३ १ १ १ १
ए । आयुर्द्धा अस्मभ्यं वर्चोधा देवेभ्या २३४५ः ॥ २ ॥

१ २२ १ २२ १ २ २ १ २ १

उन्नयम् ॥ उन्नयामि । होयि ।३। आदित्यं प्राञ्चं यंत मुन्न-

२२ १ २ २ २ १२ २२ १ २ २

यामि । होइ ।३। अहोरात्राण्यरित्राणि । होयि ।३। द्यौर्नौर्हाउ ।३।

१ २ २ २ २ १ २ २ २ २

तस्या मसावादित्य ईयते हाउ ।३। तस्मिन्वयमीयमान ईयामहे हाउ

१२ २ २ १२ २ २ ८ १२ २ १

॥३। इयामहे हाउ ।२। ईयामहे ३। हाउवा । प्रियेधामꣳ स्त्रिय-

२ २ १२ २ २ १ २ ३ १ २ १ १

क्षरे ।२। प्रियेधामꣳ स्त्रियक्षरे २३४ꣳ ॥ ३ ॥

४ २ ५ ४ १ २

गायत्री सामौशनम् ॥ प्रेष्ठंवाः । अता २३ यिषीम् ।

१ २ २ १ २ १ २ २

स्तोषे मित्रम् । इव मा २३ याम् । अग्नायि रा ३ था ३ म् ।

१ २ १ ५ ५

नावा २३ हा ३४३यि । दा २३४यो ६ हायि ॥ ४ ॥

४ २ ५ २ ४ ५ ४ ५ २ ४ २ १ २ २ १

शुद्धाशुद्धीये ॥ एतोन्विन्द्रꣳ स्तवा मा । शुद्धꣳ शुद्धेनसा

२ १२ २ २ २ १ २ १२ २ १

२३ म्ना ।शुद्धैरुक्थैर्वा वृध्वा २३ꣳ साम् । शुद्धैरा२३शी ३। र्वां

२ ३ २ ५ २ ३ २ १ १ १

२ न् । ममा ३४ औहोवा । तू २३४५ ॥ ५ ॥

५ २ २ ५ २ १ २ २ १ — १

एतोन्विन्द्रꣳस्तवा ६ मा । शुद्धꣳ शुद्धे । न । साम्ना२। शुद्धा-

२ २ १२ २ ३ ५ २ १२

इ६ ३ कथा ३ इः । वावा२र्ध्वा २३४ꣳ साम् । शुद्धैरा २३

२ १ २ १ २ १

शी । वान्ममत्तु । इडा २३ भा ३४३ । ओ २३४५ इ । डा ॥६॥

१ ३२ २२ ३२ २२

राजनम् ॥ हुम् ।३। हो ।३। हꣳ ।३। ओ हा ।३। औहोयि

३१ २१ १ २ १ २१ ३ ४ ५ १ १
।२। औहोयि । इन्द्रन्नरो । ने ३ मधि । ताहवन्तायि ।३। वयो
२१ १ २ १ १ २ १२ २ १ २ ३
बृहत् ।३। विभ्राष्टये विधर्मणे ।३। यत्पारियाः । युनज । तायिधि-
४ ५ २ १ २ १ २१ १२ २
यस्ताः ।३। सत्यमोजः ।३। रजः सुवः ।३। शूरोनृषा । ता ३
१ २ ३ ४ १ २ १ २ १ २ २
श्रव । सश्चकामायि ।३। भद्रꣳ सुधा ।२। भद्रꣳ सुधे । षमूर्जम् ।
१ २ १ २ २ १ २ २ ३ ४ ५ २ १
इषमूर्जम् ।२। आगोमतायि । व्रजेभ । जातुवन्नाः ।३। बृहद्यशः
२ १ २ १ २ १ २ २ १ २ १ २ १ २
।३। दिविदधे ३ हम् ।२। दिविदधे ३। हाउवा । वागीडा सूवो
१ २ २ ३ १ १ १ १
बृहद्भा २३४५ः ॥ ७ ॥

२१ १ १ १ २ १
रौहिणम् ॥ हाउ ।३। आयिहौ ।३। आयिहिया ।३। आ-
२ १ २ १ २ १ २ २
साउ ।३। आयाम् ।३। नामाः ।३। किट् ।२। इन्द्रन्नरो नेमधि-
२ — १ २ २ २ — २ २ २ २
ताहवा २ न्तायि । यत्पार्यायुनजते धिया २ स्ताः । शूरोनृषा
२ — १ २ २ २ २ — १
ताश्रवसश्चका २ मायि । आगोमति व्रजेभ जातुवा २ न्नाः ।
१ २ १ १ २
मना २३ होयि । प्राणा २३ होयि । चक्षू २३ होयि । श्रोत्रा
१ २ १ १ २
२३ꣳ होयि । घोषा २३ होयि । व्रता २३ꣳ होयि । भूता २३ꣳ
१ २ १ २ १ २
होयि । पाना २३ꣳ होयि । चित्ता २३ꣳ होयि । धीता २३ꣳ

१ १ १ २ ३ ५२ २
होयि। सुवा २३ होयि। ज्योता २३ इहो २।वा २३४ औहोवा।
३ १ १ १ १
ऊ २३४५ ॥ ८ ॥

२२ २ २ २ २ २ १२ २
बृहत् ॥ औहोयि त्वामिद्धि हवामहे ३ ए। सातौ वाजा।
२ ३ ५ १ २ ३२ ४२ ५ २ १
स्याकारा २३४ वाः। तुवा ३४। औहोवा। वृत्राइ षुवाइ।
२ २ ३ ५ ३२ १ २ ३२ ४२ ५
द्रासा ३१ त्। पतिन्ना २३४ राः। त्वां काष्ठा ३४। औहोवा।
— १ — ५ ५ १
सू २ अर्वा २३४। ताः। उहुवा ६ हाउ। वा। हसू ॥ ९ ॥

२ऽ २ २ २ १ २२ २
रथन्तरम् ॥ आभित्वा शूरनोनु मोवा। आदुग्धा इव धेन
२ २ १ २ १ २ २१ ४
व ईशानमस्य जगतः। सुवा २३ ईशाम्। आइशानमा २३ इन्द्रा
१ २ २ ५ ५ १
३। तास्थु २३४ षा। ओवा ६। हाउवा। असू ॥ १० ॥

२२ १२ २ १ २
पुरुषगति ॥ हाऊ।३। सेतूँ स्तर ।३। दुस्त। रान् ।३।
२ २२ १२ २ २२ २ २ १ १ २
दानेनादानम् ।३। हाउ।३। अहमस्मि प्रथमजा ऋता २३ स्या
१ १ १ २२ १२ २ २ १ २ २१ १२
३४५। हाउ।३। सेतूँ स्तर ।३। दुस्त। रान्।३। अक्रोधेन क्रो-
२ १ २ २२ १२ २२ २ २ २ २ १
धम्।२। अक्रोधेन क्रोधम्। हाउ।३। पूर्वे देवेभ्यो अमृतस्य ना२३
२ १ १ १ २२ १२ २ १ २ १ २
मा ३४५। हाउ।३। सेतूँ स्तर।३। दुस्त। रान्।३। श्रद्धया
२२ २२ २ २ २ २ १ २ १ १ १
श्रद्धाम्।३। हाउ।३। यो मा ददाति सइदे वमा २३ वा ३४५ त्।

२र १२र २ १ २१२र २
हाउ ।३। सेतू ४ स्तर ।३। दुस्त । रान् ।३। सत्येनानृतम् ।३।
२४ २ १ २ १ १ १ ५ऽ ऽ ऽ
हाउ ।३। अहमन्नमन्नमदन्तमा २३ ब्री ३४५ । हाउ हाउ हाउ
२१ २२१२१ १ २ १२ २
वा । एषा गतिः ।३। एतदमृतम् ।३। स्वर्गच्छ ।३। ज्योतिर्गच्छ ।३।
१२र २२ १२ २१ १ १ १ १
सेतू४ स्तीर्त्वा चतुरा २३४५ः ॥ ११ ॥

— २ १२ २ १ २२ १
महानाम्न्यः ॥ ए २। विदामघवन्विदाः । गातुमनुशं४
२ २ ५ — १ र २ र ४
लिषः । दाइशा ३१ उवा २३। ई ३४ डा। ए २। शिक्षा शचीनाम्प-
१ २२ र १२ — १ २ २ ५ २२ १
ताइ । पूर्वीणाम्पुरू २। वसा ३१ उवा २३। ई ३४ डा । आभि-
— १ २ २ ५ १ र
ष्टुमभा २ यि । ष्टिभिरा ३१ उवा २३। इ ३४ डा । स्वर्णा४ शू
२ २ ५ १ र र २
२। हा ३१ उवा २३। ई ३४ डा । प्रा । चेतन प्रचेतया । इन्द्रा ।
१२ — १ १ १ २ र १२ १ २
द्युम्नायना २ इषा इ । इडा । इन्द्रा । द्युम्नाय०। अथा । इन्द्रा ।
२ १२ १ र र र र र २ २ २
द्युम्ना०। इडा । एवा हि शक्रो राये वाजाय वा ३ ज्री ३ वाः ।
२ १ २ ४ ५ १ १ २
शविष्ठ वज्रिन्ना ३। जासाइ । म४ हिष्ठ वज्रिन्ना २३ हो । जासा
१ १ १ १ १ २ १ — १
३१ उवा २३। इट्इडा २३४५। आया। हि पिबमा २ त्सुवा । इडा
१ १ १ १ — १२ र र र १२ र र र
२३४५ । ए २। विदाराये सुवीरियाम् । भुवो वाजानाम्पतिर्वश ४
— १ २ २ ५ — १ २
२। अनुआ ३१ उवा २३। ई ३४ डा । ए २। म४ हिष्ठवज्रिन्नृ-

१ १ १ ^ २ २ ५
असाइ । यः शविष्ठः शूरा २। णा ३१ उवा २३। ई ३४ डा ।
१२ १ ^ २ २ ५ १
यो म꣡ हिष्ठो मघोऽ २। ना ३१ उवा २३। ई ३४ डा । अ꣡शुर्न-
१ ^ २ २ ५ १ १ १
शोचा २ इः । हा ३१ उवा २३ । ई ३४ डा । चायि । कित्वो
२ २ १२ — १ १ २ १२
अभिनोनया । ईन्द्रो । विदेतमू २ स्तुहाय । इडा । ईन्द्रो । विदे-
— १ १ १ २ २ १२ — १
तमू २ स्तुहायि । अथा । ईन्द्रो । विदेतमू २ स्तुहायि । इडा ।
१ १ १ २ २ २ १ २ २ ४
ईशे हि शक्रस्तमूतये हवा १ मा ३ हायि । जेतारमपरा ३। जायि-
५ १ १ १ २ १
तामू । सनः स्वर्षदता २३ होयि । द्वाइषा ३१ उवा २३ । इट्-
१ १ १ १ १ २ २ १ — १ १ १ १ १
इडा २३४५ । क्रातूः । छन्दऋता २ म्बृहात् । इडा २३४५ । ए
— १ २ २ १ १ २ २ २ — १ २
२ । इन्द्रं धनस्य सातयायि । हवामहे जेतारमपरा २। जितमा ३१
२ ५ — १ २ १ १
उवा २३। ई ३४ डा। ए २। सनः स्वर्षदतिद्विषाः । सा नः स्वर्ष-
— १ २ २ ५ १२
दता २ यि । द्विषआ ३१ उवा २३। ई ३४ डा । पूर्वस्य यत्त आ
— १ २ २ ५ २ १ २ ^ २
२ । द्विवआ ३१ उवा २३। ई ३४ डा । अ꣡शुर्दाया २। हा
२ ५ १ १ २ २ २ १ २
३१ उवा २३। ई ३४ डा । सू । म्न आधेहि नो वसाउ । पूर्त्तीः ।
२१ — १ १ १ २ २१ — १
शविष्ठशा २ स्यतायि । इडा । पूर्त्तीः । शविष्ठशा २ स्यतायि ।
१ १ २ २१ — १ १ १ २ २
अथा । पूर्तीः । शविष्ठशा २ स्यतायि । इडा । वशी हि शक्रो नून-
२ २ २ २ १ २ २ ४ ५ १ २
न्तन्नव्य꣡ सा १ न्या ३ सायि । प्रभोजनस्यवा ३। त्राहान् । समर्येषु-

१ १ १११२ १२
ब्रवा २३ होयि। वाहा ३१ उवा २३। इट् इडा २३४५। शूरो।
१२ २. — १ १ १ २ २१२ — १ १
यो गोषु गा २ च्छतायि। इडा। साखा। सुशेवो २ द्वयुः। इडा
१११११ १ २ ३२ १ १११११ १ १ २२
२३४५। आयिवा। हिये वा २३४५। होयि। हो। वाहा ३१
२ ५ १ २ १ १११११ १
उवा २३। ई ३४ डा। आयि वा। हियग्ना २३४५ यि। होयि।
१ २२ २ ५ १ २ १
हो। वाहा ३१ उवा २३। ई ३४ डा। आयिवा। हिइन्द्रा
१ १११ १ १ २२ २ ५ १
२३४५। होयि। हो। वाहा ३१ उवा २३। ई ३४ डा। आयि-
२ २२१ १११११ १ १ २२ २
वा। हिपूषा २३४५ न्। होयि। हो। वाहा ३१ उवा २३। ई
५ १ २ २२ १११११ १ १ २२
३४ डा। आयिवा। हि देवा २३४५:। होयि। हो। वाहा ३१
२ ५
उवा २३। ई ३४ डा॥ १२॥

२२ २२ १२
महादिवाकीर्त्यम्॥ हाउ।३। आयुः।३। ज्योतिः।२।
३२ २ ५२ २ २ १२ २ ३ ११११
ज्योता ३४। औहोवा। ए ३। वाग्ज्योति २३४५:॥ १३॥

२२ २ ३ ५२ २ २२
ज्येष्ठसामानि। एवाहिये वा २३४। औ होवा। हाइ हइ
२२ ५२ २ २ २ १ २ १ २ १
हाइ हइ हइ ३४। औहोवा।३। हि येवा। हियग्नायि। हिइन्द्रा।
२२ १ २२ १ १ १ १ १
हिपूषान्। हिदेवा २३४५:॥ १४॥
२ २ २ १ २ २ १ २ २ २ २
वयोमनोवयः प्राणाः। वयश्चक्षुर्वयः श्रोत्राम्। वयो घोषो
२ १ २ १ २ ३ २ १ १ १ १
वयो व्राताम्। वयो २३ मूताउ। वा ३। ई २३४५॥ १५॥

२ ₹ १ १ २ ^३ ५ २ १₹
वयो मना २३ः । होइ हौवाओ २३४ वा । वयःप्राणा २३ः ।
१ २ ^२ ५ २ १ १ २ १₹
होयि हौ वाओ २३४ वा । वयश्चक्षू २३ः । होयि० । वयः श्रोत्रा
१ २ ^३ ५ २ ₹ १₹ १
२३ म् । होयि हौवाओ २३४ वा । वयो घोषा २३ः । होयि० ।
२ ९ १ १ २ ^ २ ₹ १₹ १
वयोव्रता २३ म् । होयि हौवा० । वयोभूता २३ म् । होयि
२ ^ ३ ३ १ १ १ १
हौवाओ २३४५ वा ६५६ । ऊ २३४५ ॥ १६ ॥

१ ^ ₹ २ २ १९ १
ऊऽ२र्कं । हाउ ।३। हो ३ वाक् ।३। धर्मो २ धर्मः।३। ॥१७॥
१ २ १ २ २ १ ₹ २ २ १ ९ . १ ९
धर्म विधर्म ।३। सत्यङ्काय ।३। ऋतं वद ।३। हꣳ वंव २ वंव
१
२ वम् ।३। ॥ १८ ॥
२₹ ₹ १₹ ₹ २₹ ₹ १₹ ₹ २
औहौ होवा होयि ।२। औहौ होवा हा ३१ उ । वा २३ ।
३ ५ २ १₹ २१ २ ₹ १ २₹ ₹ १₹ ₹
भू २३४ वात् । विभ्राड्बृहत्पिबत्तुसोम्यम् । ध्वौ हौ होवा होयि ।
२₹ ₹ १₹ ₹ २₹ ₹ १₹ ₹ २ ३
औहौ होवा होयि । औ हौ होवाहा ३१ उ । वा २३ । जा २३४
५ १₹ २ १ २१ २₹ १ २ २₹ ₹ १₹ ₹ २₹
नात् । आयुर्दधद्यज्ञपतावविह्रुतम् । औ हौ होवा होयि ।२। औ
₹ १₹ ₹ २ ३ ५ १₹ २₹ ₹ १₹ २
हौ होवाहा ३१ उ । वा २३ । वा २३४ द्धात् । वातजूतोयो अभि-
१ २ १ ₹ २₹ ₹ १₹ ₹ २₹ ₹ १₹ ₹ २
रक्षतित्मना । औहौ होवा होयि ।२। औहौ होवाहा ३१ उ । वा
३ ५ २ १ २ १₹ ₹ ₹ २₹ ₹
२३ । का २३४ रात् । प्रजाः पिपर्ति बहुधा विराजति । औहौ

१र २ २र २ १र र २ — १ २ २र १र
होवा होयि ।२। औहो होवाहा ३१ उ । वा २ । अभ्राजीज्योति-
२ ३ १ १ १ १
रभ्राजी २३४५ त् ॥ १९ ॥

१र २ १ २ १ २ ५र २
भूमिः ।३। अन्तरिक्षम् ।३। द्यौः ।२। द्या ३४। औ होवा ।
२ २र १र १ १ १ १
ए ३। भूताया २३४५ ॥ २० ॥

१र २ १ २ २र ३र २ ५र २
द्यौः ।३। अन्तरिक्षम् ।३। भूमिः ।३। भूमा ३४। औ होवा ।
२ १र ३ १ १ १ १
ए ३। आयुषे २३४५ ॥ २१ ॥

१र १र ३र २ ५र २ ३ १ १ १
हाउ ।३। ज्योतिः ।२। ज्योता ३४। औ होवा । ई २३४५ ॥ २२ ॥
३र २र ३ ४ ५ २र १र २ १
हाउ ।३। आज्यदो हम् ।३। मूर्द्धानन्दाइ । वा ३ अर ।
२ ३ ४ ५ २र १र २ १ २ ३ ४ ५ २ १
तिम्पृथिव्याः । वैश्वानराम् । ऋतआ । जातमग्नीम् । कविꣳसम्रा ।
२ १ २ ३ ४र ५ २र १ २ १ २ ३ ४र ५
जा ३ मति । थिञ्जनानाम् । आसन्नः पा । त्रा ३ ञ्जन । यन्तदेवाः ।
२र २र ३ ४र ५ २र ३ ४ २र र
हाउ ।३। आज्यदोहम् ।२। आज्यदो ५ हाउ । वा । ए । आज्य-
१ २ २र र १ ३ १ १ १ १
दोहम् ।२। ए । आज्यदोहा २३४५ म् ॥ २३ ॥

२र र १ २ २र १र २ १
हाउ ।३। हुम् । चिदोहम् ।३। मूर्द्धानन्दाइ । वा ३ अर ।
२ ३ ४ ५ २र १र २ १ २ ३ ४ ५ २ १
तिम्पृथिव्याः । वैश्वानराम् । ऋतआ । जातमग्नीम् । कविꣳसम्रा ।
२ २ ३ ४र ५ २र १ २ १ २ ३ ४र ५
जा ३ मति । थिञ्जनानाम् । आसन्नः पा । त्रा ३ ञ्जन । यन्तदेवाः ।

२र र १२ १९ २ २ ३
हाउ ।३। हुम् । चिदोहम् ।२। चिदो ३ । हाउ । वा ३। इ
१ १ १ १
२३४५ ॥ २४ ॥

२र १२ २र १र २ १ ३
हाउ ।३। च्योहम् ।३। मूर्द्धानन्दाइ । वा ३ अर । ति० ।
२र १२ ९ २ २ २ २१
पूर्ववत् । हाउ ।३। च्योहम् ।२। च्यो ३ हाउ । वा ३। ए ३।ऋतम्।२५
१ २ १ १ २ १ १ २ १ १ २१
अधिप । ताइ । मित्रप । ताइ । क्षत्रप । ताइ । स्वः पताइ ।
१ २ — — १ १ १ २ १र र २ १र २ १र २
धनपता २ इ । ना २ माः । मन्युना वृत्रहा सूर्येण स्वराज्य ज्ञेन म-
१२२ २ १र २१२र२र १ २२ र २ १ र २१र
घवा दक्षिणास्य प्रिया तनुराज्ञा विश्नन्दाधार । वृषभस्त्वष्टा वृत्रेण
२ र १ २१ र २ १ २ १र २१र र २र १ १ २ र
शची पतिरन्नेन गयः पृथिव्या सूणिकोऽग्निना विश्वम्भूतम। भ्यभवो
र १ र १ २१र २ र र १र र २ १र र र २ र १र
वायुना विश्वाः प्रजा अभ्य पवथावषट्कारेणाद्भिर्मावसोमेन सोमपाः
२र र १र १र र २र र र २ १२ १ र र २र र र र
समित्या परमेष्ठी। ये देवा देवाः। दिविषदः। स्थ तेभ्यो वो देवा दे
१र २र १ २ १र र २र र र २ १ २ १ र र २र १र
वेभ्यो नमः। ये देवा देवाः। अन्तरिक्ष सदः। स्थ तेभ्यो वो०। ये
र २र र र २ र १ २ १ र र २र १र र २र र र २
देवा देवाः। पृथिवीषदः। स्थ तेभ्यो वो०। ये देवा देवाः। अप्सु-
१ २ १ र र २र १र २ २र र र २ १ २ १ र र २र
षदः। स्थ तेभ्यो वो०। ये देवा देवाः। दिक्षुसदः। स्थ तेभ्यो वो०।
१र र २र र र २र र १ २ १ र र २र १ २ १ २र २
ये देवा देवाः। आशासदः। स्थ तेभ्यो वो० नमः। अवज्यामिव
२ २र १ २ १ २र १ २ २ १ २ १ २ १
धन्वनो विते मन्युन्नयामसि मृड तान्न इह आरमभ्यम्। इडा २३

२ १ २ २ १ १ ३
भा। य इदं विश्वम्भूतम् । युयो ३ । आउ । वा २३ । ना
५
२३४ माः ॥ २६ ॥
१ २ १ १ २ १ १ २ १ १ २ १
अधिप । ताइ । मित्रप । ताइ । क्षत्रप । ताइ । स्वःपताइ ।
१ २ — — १ १ २ १ २१ २ १२ २
धनपता २ इ । ना २ माः । नम उत्त तिभ्यश्चोत्तन्वानेभ्यश्च
१ २ २१ १ २१ २ १ २ १ २ २ १ २ २१ २ २
नमो निषङ्गिभ्यश्चोपवीतिभ्यश्च नमो स्यदूभ्यश्च प्र । तिदधानेभ्यश्च
१ २ १ २ २ १ २ १ २ २ १ २
नमः प्रविध्यदूभ्यश्च प्रव्याधिभ्यश्च नमः त्सरदूभ्यश्च त्सारिभ्यश्च
१ २१ १२ २ २ १ २ १ २ १ २ १ २
नमः श्री । तेभ्यश्च श्रायिभ्यश्च नम स्तिष्ठदूभ्यश्चो पतिष्ठदूभ्यश्च
१ २ २ १ २ १२ २ १ २ १ २ २ १ २ १ २ २
नमो यतेच वियते च नमः पथे च विपथाय च । अव ज्यामिव
१ २१ १ २ २ १ २१ १ २ २ १ २ १ २ ४
धन्वनोविते मन्युन्नयामसि मृड तान्न इह अस्मभ्यम् । इडा २३
२ १ २ १ ३
भा। य इदं विश्वम्भूतम् । युयो ३ । आउ। वा २३ । ना २३४
५
माः ॥ २७ ॥
१ २ १ १ २ १ १ २ १ २ १
अधिप । ताइ । मित्रप । ताइ । क्षत्रप । ताइ । स्वः पताइ ।
१ २ — — १ २ १ २ १ २ २ १ २ १
धनप ता २ इ । ना २ माः । नमोऽन्नाय नमोन्नपतय एकाक्षाय
२ २ १ २ २ १ २ १ २ १ २ २ १ २ १ २ १
चावपन्नादाय च नमो नमः । रुद्राय तीरसदे नमः स्थिराय स्थिर
२ १ २ १ २ २ १ २ १ २ १ २ २
धन्वने नमः प्रतिपदाय च पटरिणे च नमस्त्रियम्बकाय च क ।
२ १ २ २ १ २ २ १ २ २ १ २ २ १ २ १ २ २
पर्दिने च नम आश्रायेभ्यश्च प्रत्याश्रायेभ्यश्च नमः क्रव्येभ्यश्च वि-

१२ २ १ २१२२ १२१ १२ १२ २ १ २१ १२
रिक्षेभ्यश्च नमः संवृते च विवृते च । अव ज्यामिव धन्वनोविते
२१ २२ १ २ २ १ २ १ २ १ २ १
मन्युन्नयामसि मृड तान्न इह अस्मभ्यम् । इडा २३ भा । य इदं
२ १ ३ ५
विश्वम्भुतम् । युयो ३ । आउ । वा २३ । ना २३४ माः ॥२८॥

२१ २ २१ २२
पुरुष व्रतानि। उहुवा हाउ । ३ । सहस्र शीर्षाः पुरु २३
२ २ १ २१ २ १२ २१२
षाः । सहस्राक्षः सहस्रा २३ पात् । सभूमिꣳ सर्वतो वा २३
२ १ २१२ २ २१ २ २१२
त्वा । अत्यतिष्ठ दशाङ्गु २३ लाम् । उहुवा हाउ । २ । उहुवा
२ २ १ १२२१
३ हाउ । वा ३ । इट् इडा २३४५ ॥ २९ ॥

२१ २ २ — २१२२ २ २ १२२ २
उहु वौ होवा २।३। त्रिपादूर्ध्व उदैत्पुरु २३ षाः । पादोस्ये-
२ २१ २ १२ २१ २ २ २
हा भवत्पु २३ नाः । तथाविश्वङ्व्यक्रा २३ मात् । अशनान-
१२ २ १२ २ — २१२ १ ^ ३
शनेआ २३ भी । उहुवौ होवा २।२। उहुवौ । हो २। वा २३४।
५२ २ ३ ५ २१२ २ — २१ २ ^
औहोवा । इ २३४ डा । उहुवौ होवा २। २ । उहुवौ । हो २ ।
३ ५२ २ ३ ५ २१२ २ —
वा २३४ । औहोवा । मु २३४ वाः । उहुवौ होवा २ । २ ।
२१ २ २ ^ ३ ५२ २ ३ २१११
उहुवौ । हो २ । वा २३४ । औहोवा । ऊ २३४५ ॥ ३० ॥

१ २ २ — १ २ २ २ १ २ २
इयौ होवा २ ।३। पुरुष एवेदꣳ सा २३ वाम् । यद्भूतं यच्च
५२ २ १२ २ २ २ २ १२ २ २१
भावा २३ याम्। पादोऽस्य सर्वा भूता २३ नी । त्रिपादस्यामृत-

२ १ २ २ — १ २ १ ^ ३
न्दा २३ इवी । इयौ होवा २ । २ । इयौ । हो २ । वा २३४ ।
५२ २ ३ ५ १ २ २ — १ २ १ ^ ३
औहोवा । ई २३४ डा । इयौ होवा २ । २ । इयौ । हो २ । वा
५२ २ ३ ५ १ २ २ — १ २
२३४ । औहोवा । ज्यो २३४ तीः । इयौ होवा २ । २ । इयौ ।
१ ^ ३ ५२ २ ३ १ १ १ १
हो २ । वा २३४ । औहोवा । इ २३४५ ॥ ३१ ॥

२२ १२ २ २ १ २ २२
हाउ । ३ । तावानस्य । महा २३ यिमा ३ । हाउ । ३ ।
१ २ २ २ २ १२ २ २२ २ १ २ २
ततो ज्यायाꣳ श्च पुरु २३ षा ३ः । हाउ । ३ । उतामृतत्वस्ये-
२ २२ १ २ २ २ १२ २ २
शा २३ ना ३ः । हाउ । ३ । यदन्नेनातिरोहा २३ ती ३ । हाउ
२ १ १ १ १ १
उ । ३ । वा ३ । इद् इदा २३४५ ॥ ३२ ॥

२ १ २ १२ २२ २ २ १२
हाउ उ ३ वा । ततो विराडजायत । हाउउ ३ वा । विरा-
२२ १ २ १२ २ २ १ २२ १ २ २
जो अधिपूरुषः । हाउउ ३ वा । स जातो अत्यरिच्यत । हाउउ ३
२ १२ २ २ १ २ २ १ १ १ १
वा । पश्चाद्भूमिमथो पुरः । हाउउ ३ वा ३ । ई २३४५ ॥३३॥

२२ १ २ १ २ १ २ १ २
हाउ । ३ । अस्मिनस्मिन् । ३ । नृम्णाइ नृम्णम् । ३ ।
१ २ २ २ १ २ — २ २
निधाइमाहे । ३ । कयानश्चित्रा ३ आभू १ वा २ त् । ऊती स-
२ १ — २ २ १ २
दावृ ३ धाः सा १ खा २ । कया शचिष्ठा ३ यावा १ र्ता
२२ १ २ १ २ १ २ १ २
२३ । हाउ । ३ । अस्मिनस्मिन् । ३ । नृम्णाइ नृम्णम् । ३ ।

१ २ १ १ ^ ३ ५२ २ १
निधाइमाहे ।२। निधा २३ यि। धा २ । हा २३४ औहोवा । सुव-
२ ३ १ १.२ २
र्ज्योति २३४५ः ॥ ३४ ॥

२२ १ —
तवइयावीयम् ॥ हाउ । ३ । ऊ २ । ३ । हुऊ २ । ३ ।
१ २ १ २ ऽ २ २ १ २ १ १ १ १
इया हाउ । २ । इया ३ हाउ । वा ३ । इट्इडा २३४५ ॥ ३५ ॥
२ २ १ २ १ २२ २ १ २ २२ १ २

हाऽउ ३ वा । अग्निरस्मि जन्मना जातवेदाः । इडा । सुवः ।
१ २ २ २ २ १ २ १ २ २ १ १ २ १
इडा । हाऽउ ३ वा । घृतं मेचक्षुरमृतं म आसन् । इडा । सुवः ।
२ २ २ १२ २ १२ २२ १२ २ १ २ १
इडा । हाऽउ ३ वा । त्रिधातुरर्को रजसो विमानः । इडा । सुवः ।
१ २ १ २ १२ २ १ २ १२ २ २
इडा । हाऽउ ३ वा । अजस्रं ज्योतिर्हविरस्मि सर्वम् । इडा ।
१ १ २
सुवः । इडा ॥ ३६ ॥
२२ २२ २ १ २२ २

हाउ । ३ । पात्यग्निर्विपो अग्रं पदं वेः । हा ३१ उवा २३ ।
३ ५ २ २ ३ ५
सू२३४ वाः । इह । हा ३१ उवा २३ । ज्यो २३४ तीः ।
२२ २२ २ १ २ २
हाउ । ३ । पाति यहश्चरणꣳ सूरियास्या । हा ३१ उवा
३ ५ २ २ ३
२३ । सू२३४ वाः । इह । हा३१उवा२३ । ज्यो२३४
५ २२ २२ २ २ २ २ १ २ २
तीः । हाउ । ३ । पातिना भा सप्तशीर्षाणमाग्निः । हा३१उवा-
३ ५ २ २ ३ ५
२३ । सू२३४वाः । इह । हा३१उवा२३ । ज्यो२३४तीः ।
२२ २२ २ २ २ २१ २ २ ३
हाउ । ३ । पाति देवानामुपमादमार्ष्वः । हा३१उवा२३ । सू२३४

५ २ २ ३ ५
वाः। इह। हा३१उवा२३। ज्यो२३४तीः॥ ३७॥

१ — १ २ २१ २ १
इया २। ३। इया हाउ। ३। इन्द्रं नरो। ने ३ मधि।

२र३४५ २ १ २र ३र २ १ २ १
ताहवन्ताइ। हवन्ते ३। ह॑ह॑हा॑हा॑ह॑ह॑। ३। हवन्ते। ३। यत्पा-

२१ २ ३४ ५ २ १ २र ३र २
रियाः। युनज। तायिधियस्ताः। धियस्ता ३ः। ह॑ह॑हा॑हा॑ह॑ह॑

२ २र१र २ १ २ ४र ५
। ३। धियस्ताः। ३। शूरोनृषा। ता ३ श्रव। सश्चकामायि।

२र १ २र ३र २ १र र २र१र
चकामे ३। ह॑ह॑हा॑हा॑ह॑ह॑। ३। चकामे। ३। आगोमतायि।

२१र २र३४ ५ २ १ २र ३र २
व्रजेभ। जातुवन्नाः। तुवन्ना ३ः। ह॑ह॑हा॑हा॑ह॑ह॑। ३।

१ १ — १ २ १ २ १ ऽ २
तुवन्नः। ३। इया २। ३। इया हाउ। इयाहाउ। इया ३ हाउ।

र १र २र १
वा। ए। व्रतमेसुवरे शकुनः॥ ३८॥

२र र र १ २ २र र २ —
भ्राजा औहोहो हायि। त्यग्ने समिधानादी १ दिवा २ः।

र र १ २ १ २ — र र
जिव्हा औहोहोहायि। चरत्यन्तारा १ सानी २। सत्वा औ-

१ २ १र र र २ ऽ १
हो हो हायि। नो अग्ने पयसावसू ३ वीत्। रयिं वर्चो

२ ३र ८ १ — १ २ ४ ५ ४
दशौहो ३। हुम्मा २। दा। औ ३ होवा। हो ५ इ। डा॥३९॥

१र १ र १ २ १ २ १ २ १र
[ॐभूः। ॐ भूमिर्दिवमन्तरिक्षम्। ॐभुवः। ॐऋचो यजू॑

२ र १२ १ र र र २ ३ १ १ १ २ १२ १र र र
षि सामानि । ॐ भार्गो देवस्य धीमाहीं ३४५ । ॐ प्राणोऽपानो
र र २ र १ २ १र र २ १ १ १ १ १
व्यानः समान उदानः । ॐ धियो योनः प्रचो ३४५ । ॐ महः । ॐ
१ १ १ १ २१र र २ १
जनः । ॐ तपः । ॐ सत्यम् । ॐ पुरुषाः । ॐ पुरोरजो अमृतोम् ।
२ १ ३१ १ — १ २ १ १ १ र
ॐ ह्ः ३४५ । हुम् । आ २ । दायो । आ ३४५ । ॐ भूमिरन्त-
२ १र र १ १ ^ २र २
रिक्षं द्यौः । ॐ तत्सवितुर्वरेणियोम् । ॐ उऽ२ र्क । हाउ । ३ । होऽ
१ १ र र १ १ १ ^ २र
३ वाक् । ३ । ॐ ऋचोयजो अमृतोम् । ऊ २ र्क् । हाउ । ३ ।
२ २ १ २र१र र र र र २१ २१र
हो ३ वाक् । ३ । ३ । ॐ प्राणोऽपानो व्यानः समान उदानः । धियो
र १ १ १ १ १ ^ २र २ २
योनः प्रचो ३४५ । ॐ ऊऽ २ र्क् । हाउ । ३ । हो ३ वाक् । ३ ।
१र१ १ १२ १ २ २ १ र २ २ १
धर्मो २ धर्मः । ३ । धर्म विधर्म । ३ । सत्यं गाय । ३ । ऋतं
२ २ १९ १ ९ १
वद । ३ । ह्ः वं व २ वं व २ वम् । ३ । ॥४०॥]

तवश्यावीयं प्रयुञ्जानः शुचिः पूतो ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्त्तते न च पुनरावर्तते ।

१ र २ २ १ र र १ र र २ र १
सन्त्वा भूतान्यैरयन् । होयि । सन्त्वाभव्यान्यैरयन् । होयि ।
१ र २ १ र २ १ १ र २ र १
सन्त्वा भविष्यदैरयत् । होयि । सन्त्वा भुवनमैरयत् । होयि ।
१ र २ र १ र २ १
सन्त्वा भूतमैरयत् । होयि ॥ १ ॥
१ — १ १ — १ १ — १ १
उवी २ उवि । उविहो २ उवि । ३ । इती २ इति । इति

— १ २ — १ १ — १ १ २
हो २ इति । ३ । असी २ असि । असिहो २ असि । ३ । अरु-
२ २ १ २ १२ १ — १ १ — १
रुचो दिवं पृथिवीम् । असी २ असि । असि हो २ असि । ३ ।
१ २ २ १२ २ २२ ९ १ १ २ ३ ५
पतिर । स्यपामोषधीना ३ म् । ओयि । पतायिरा २३४ सौ । ३ ।
१ २१ २ २१ १ २१ १ २ २ १ २ २ २ १ २ २ १
चायि । त्रं देवाना मुदगादनीकम् । वायि श्वेषां देवाना९ समि-
२ १२ २ १२ ९ १ १२ १
दजस्र ज्योतिरातत२म् । होयि । ३ । आयुर्यन् । ३ । अवः । ३ ।
१ २१ २ १ २ २ १२ २ ३ २
चक्षुर्मित्रस्य वरुणस्याग्नेः । सुवः स ९ सर्पस ९ सार्पा । ३ ।
२ १२ — १ १ — १ — १
जनावन ९ सुवा २ स्सुवः । जना २ वना २ म् । सुवा २ः
१ १२ २ २ २ २ ७ २ २
सुवः । ३ । आ प्राद्यावा पृथिवी आन्तरि २ क्षा३म् । सृपिप्र-
२ २ २ २ २ २ २ २ २ २ २ २
सृपीऐही । ३ । अस्तोषतस्वभानवाऐही । विप्रानविष्ठयामता
२ २ २ २ २ २ २ २ २
ऐही । ग्रावाणो वर्हिषि प्रिया ऐही । इन्द्रस्यर९ हियं वृहा-
२ २ १ — १ — १ — २
दैही । इन्द्रा २ । स्यरा २ । हिया२म् । बृहदिन्द्रस्यर ९
२ २ २ १२ २ २ ७ २
हियं वृहा दैही । ३ । सूर्य आत्मा जगस्तास्थुषा २३ श्रा ३ ।
२ २ २ २ २ २ २ २ २ २ २
अन्तश्चरति रोचना ऐही । ३ । अस्य प्राणादपानता ऐही
२ २ २ २ १२ २२ १२ २२
। ३ । व्यख्यन्महिषो दिवामैही । ३ । प्रो एति प्रो एति । ३ ।
१ २२ १ २२ १ २ २ ५२ २ २
प्रो । एति । प्रो । एति । प्रो २३ । एता ३४ औहोवा । ए ३ ।

२२१२ २ २ ३ १ १ १ १
देवा दिवा ज्योती २३४५ः ॥ २ ॥

१९ १९ १ २ २ २
उवी २।३। हिगी २।३। हिगिगि । ३ । आयङ्गौः पृश्निर-
२ २ २ २ २ २ २ २
क्रमीदेही । ३ । असदन्मातरं पुरा ऐही । ३ । पितरं च प्रयं
२ २ २ १९ १९ २ २
त्स्वा ऐही । ३ । उवी २ । ३ । हिगी २ । ३ । हिगिगि । ३ । ॥ ३ ॥

२१ २१ २ १ २२ २
उवी । ३ । हिगी । ३ । हिगिगी । ३ । आयङ्गौः पृश्निर-
२ २ २ २ २ २ २ २ २ २ २
क्रमीदेही । असदन्मातरं पुरा ऐही । पितरञ्च प्रयन्त्स्वाऐही ।
२ १ २ १ २ १
उवी । ३ । हिगी । ३ । हिगिगी । ३ ॥ ४ ॥

२२ २ २̂ ३२ २२ ३२ २ २ २ २ १
हाउ हाउ हाउ । भ्राजा ओवा । ३ । उदुत्यञ्जा । ३ । चित्रं
२ २ २ ७ २ २२ २ २̂ ३२ २२ ३२ २
देवानामुदगादनी २३ का ३ म् । हाउ हाउ हाउ । भ्राजाओवा
२२ १ ७ ३
। ३ । तवेदसम् । ३ । चक्षुर्मित्रस्य वरुणास्य आ २३ प्रा ३
२२ २ २̂ ३२ २२ ३२ २ २२ २ १२ २
यिः । हाउ हाउ हाउ । भ्राजाओवा । ३ । देवंवहा । ३ । आप्रा-
२ २ २ ७ २ २२ २ २̂ ३२ २२
द्यावा पृथिवी आन्तरी २३ क्षा ३ म् । हाउ हाउ हाउ । भ्राजा-
३२ २ २ २ १२ २ २ ७ २
ओवा । ३ । तिकेतवः । ३ । सूर्य आत्माजगतस्तास्थुषा २३ श्रा
२२ २ २̂ ३२ २२ ३२ २ २ २ २ १२
३ । हाउ हाउ हाउ । भ्राजाओवा । ३ । दृशेविश्वा । ३ । सूर्य

र र ७ २ २र र २ ३र २र ३र
आत्मा जगतस्तास्थुषा २३ श्रा ३ । हाउ हाउ हा३उ । भ्राजाओ-
र २र १ २ २
वा । ३ । यमूर्यम् । २ । यमू २३ रियाउ । वा ३ । ए ३ ।
२र १र र र ३ १ १ १ १
देवादिवा ज्योती २३४५ः ॥ ५ ॥
२र १ र २र १ र २र र १र र २र
हाउ । ३ । सहो भ्राज । २ । सहोभ्राजा । पोभ्राजा ।
१र र २र १र र २ १ र २र १ २र र १
पोभ्राजा । पोभ्राज । अभ्राजीत् । ३ । व्यभ्राजीत् । ३ । अदि-
२ १ र र — १
द्युतत् । ३ । अदिद्युतद्विश्वम्भूत ५ सहोबू २ हात् । अदिद्युत
र — १ र र — १ १
दभ्राट् प्रा २ भ्राट् । आदिद्युतद् घर्मो अरू रु २ चात् । अदिद्युत-
र र — १ २र १ र २र १ र
द्धर्मउषसो अरोचा २ याः । हाउ । ३ । सहोभ्राज । २ । सहो-
र २र १र र २र १र र २र १र र २ १ र २र २
भ्राजा । पोभ्राजा । पोभ्राजा । पोभ्राज । अभ्राजीत् । ३ । व्य-
र २र १ २ १ २ २ र
भ्राजीत् । ३ । आदिद्युतत् । २ । आदिद्युता ३ त् । हाउवा । ए ॥
१ २ १र २र १ र २ १ र २र १ २र ३ १ १ १ १
आदिद्युतद्धर्मो अरूरुचदुषसान्दिवि सूर्यो विभाती २३४५ ॥ ६ ॥
१र र र र र र र र २ २
औहो औहोवा । होयि । २ । औहो औहोवा । हा ३१ उ । वा
३ ५ २ १ २ र १र १र र र र र
२३ । भू २३४ वात् । अन्तश्चरतिरोचना । औहो औहोवा ॥
१ १र र र र र २ १ ३
होयि । २ । औहो औहोवा । हा ३१ उ । वा २३ । जा २३४
५ २ १ २र १र २र १र १र र र र र १ १र र
नात् । अस्य प्राणादपानती । औहो औहोवा । होयि । २ । औहो

र र र २ १ ३ ५ १
औहोवा । हा ३१ उ । वा २३ । वा २३४ द्यौत् । ८
१र र र र र र र र
षोदिवम् । औहो औहोवा । होयि । २ । औहोऔहोवा । ह
१ ३ ५ १र र र र १ र र र
उ । वा २३ । का२३४रात् । औहोऔहोवा । होयि । २ । औहो औ
र र २ १ ३ ५ १र र र र १
होवा । हा ३१उ । वा२३ । भू२३४तीः । औहो औहोवा । होयि ।२।
र र र र र २ — १ र २र १र २ र र
औहो औहोवा । हा३१उ । वा २ । अभ्राजीज्योतिरभ्राजीत् ।
१र र र र र १ र र र र २
औहो औहोवा । होयि । २ । औहो औहोवा । हा३१उ । वा
२ १ र र र२र र१ ३ १ १ १ १
२३ । ए ३ । सर्वान्कामानशीमही २३४५ ॥ ७ ॥

२ ऽ १ ^२ ३र २र ३र र २र र
हाऽउ३वा । इन्दुः । भ्राजा ओवा । ३ । आयङ्गौः पृश्निरक्र-
र र र २ऽ १ ^३ ३र २र ३र र २ र
मीदैही । हाऽउ३वा । इडा । भ्राजा ओवा । ३ । असदन्मातरम्पु-
र र र २ऽ १ ^२र ३र २र ३र २ २
रा ऐही । हाऽउ३वा । सात्यम् । भ्राजा ओवा । ३ । पितरञ्च
र र र २ऽ १ ^२
प्रयन्त्स्वा ऐही । हाऽउ३वा । दीयौः ॥ ८ ॥

२ ऽ १ ^२ ३र २र ३र र २ र र
हाउऽ३वा । भूतम् । भ्राजा ओवा । ३ । अन्तश्चरतिरोचना
र र २ऽ १ ^२र ३र २र ३र र २ र र र
ऐही । हाऽउ३वा । पृथिवी । भ्राजा ओवा । ३ । अस्यप्राणादपा-

र र र २ऽ १ २ ३र ३र ३र र २
नता ऐहि । हाऽउ३वा । साहः । भ्राजा ओवा । ३ । व्यख्यन्महि-
र २ र र २ऽ १ २
षो दिवामैहि । हाऽउ३वा । तेजः ॥ ९ ॥

२ ऽ १ २ ३र ३र ३र र २ र र र
हा उ३वा । आपः । भ्राजा ओवा । ३ । त्रिःशद्धाम विराजता
र र २ऽ १ २ ३र ३र ३र र २र र र
ऐहि । हाऽउ३वा । ऊषा । भ्राजा ओवा । ३ । वाक्पतङ्गायधीय-
र र र २ऽ १ २ ३र ३र ३र र २ र
ता ऐहि । हाऽउ३वा । दीशः । भ्राजा ओवा । ३ । प्रतिवस्तोरहद्यु-
र र र २ऽ १ २
भा ऐहि । हाऽउ३वा । ज्योतिः ॥ १० ॥

२१ र र २र १ २ १ र र २र
उद्यंल्लोकान रोचयः । होयि । इमांल्लोकानरोचयः ॥
२ २ १ र २र १ १ ३र १ २र २ ३
होयि । प्रजा भूतमरोचयः । होयि । विश्वम्भूतमरोचयः । हो२हा
५र र २ १ र ३ १ १ १ १
२३४ औहोवा । घर्मोज्योती २३४५ः ॥ ११ ॥

२र र र ३र २र ३र र २ र १ २ १
हाउ हाउ हाउ । भ्राजा ओवा । ३ । दिदीहि विश्वतस्पृथुः ॥
२ र १ २ — २र १ २
उदुत्यञ्जाता ३ वाइदाऽ २ सा२म् । देवं वहन्ती ३ कायिताऽ २
— २ र र १ २ — २ र र १
वा २ः । दृशे विश्वाया ३ सूराऽ १ या२म् । अपत्ये ताया ३ वो
२ — २ र १ २ — २र र
याऽ १ या २ । नक्षत्रायन्ती ३ या क्तूऽ १ भा२यिः । सूराय-

१ २ — १ २
विश्वा ३ चाक्षाऽ १ सा२यि । अदश्रन्नस्या ३ कायिताऽ १
— २ ३ १ २ — ३ ३
वा २ः । विरश्मयोजा३ना ४ आऽ १ नू २ । भ्राजन्तो अग्ना ३
१ २ २३ ३ ३ ३२ ३३ ३ ३२ २
याऽया१ था २३ । हाउ हाउ हाउ । भ्राजा ओवा । २ । भ्राजा ३
४ ५ ३ १ १ १ १
ओ५वा ६५६ । ई २३४५ ॥ १२ ॥

२३ ३ ३ ३ २३ ३३ ३ २ ३ १ २ १
हाउ हाउ हाउ । शुक्रा ओवा । ३ । दिदीहि विश्वतस्पृथुः ।
२ ३ १ २ — २३ १ २
उदुत्यजाता ३ वाइदाऽ १ सा२म् । देवं वहन्ती ३ कायिताऽ १
— २ ३ ३ १ २ — २ ३ ३ १
वा २ः । दृशे विश्वाया ३ सूराऽ१ या२म् । अपत्ये ताया ३ वो
२ — २ ३ १ २ — २३ ३
याऽ १ था २ । नक्षत्रायन्ती ३ या कतूऽ १ भा२यिः । सूराय-
१ २ — २ १ २
विश्वा ३ चाक्षाऽ १ सा२यि । अदश्रन्नस्या ३ कायिताऽ १
— २ ३ १ २ — ३ ३
वा २ः । विरश्मयोजा३ना ४ आऽ १ नू २ । भ्राजन्तो अग्ना ३
१ २ २३ ३ ३ ३ २३ ३३ ३
योयाऽ१ था २३ । हाउ हाउ हाउ । शुक्रा ओवा । २ ।
३ २ ४ ५ ३ १ १ १ १
शुक्रा ३ ओ ५ वा ६५६ । ई २३४५ ॥ १३ ॥

२३ ३ ३ ३ २३३ ३३ ३ २ ३ १ २ १
हाउ हाउ हाउ । भ्रुता ओवा । ३ । दिदीहि क्रिश्वतस्पृथुः ॥
१ १ २ — ३ ३ १ २
तरणिर्विश्वा ३ दार्शाऽ १ ता २ः । ज्योतिष्कृदसी ३ सूराऽ १
— २ ३ ३ १ २ — ३ ३ १ १
या २ । विश्वमाभासी ३ रोचाऽ १ ना२म् । प्रत्यङ्देवा ३ भां-

२ — २ र १ र — २
वाऽ१ यिशा २ः । प्रत्यङ्देषी३मानू १ षा२न । प्रत्यङ्विश्व२
१ २ — र र र १ २ — २
सू३वार्दऽ १शा२यि । येनापावका३चाक्षाऽ १ सा २ । भुरण्यन्तञ्चा
१ २ — २ १ २ २र र
३ना२आऽ१ नू २ । त्वंवरुणा३पाश्याऽ१सा२३यि । हाउ हाउ
३र २र ३र र ३र २ ४ ३ १ १ १ १
हाउ । भूता ओवा । २ । भूता ३ओऽ५वा ६५६ । ई २३४५॥४१
२र र र^ ३र २र ३र र २ र १ २१
हाउ हाउ हाउ । तेजा ओवा । ३ । दिदीहि विश्वतस्पृथुः ।
२ १ २ — २र १ २
तरणिर्विश्वा ३ दार्शाऽ १ ता २ः । ज्योतिष्कृदसी ३ सूराऽ १
— २ र र १ २ — २ र १ — १
या २ । विश्वमाभासी ३ रोचाऽ १ ना२म् । प्रत्यङ्देवा ३ नां-
२ — २ र १ २ — २
वाऽ१ यिशा २ः । प्रत्यङ्देषी३मानू १ षा२न । प्रत्यङ्विश्व२
१ २ — र र र १ २ — २
सू३वार्दऽ १शा२यि । येनापावका३चाक्षाऽ १ सा २ । भुरण्यन्तञ्चा
१ २ — २ १ २ २र र
३ना२आऽ१ नू २ । त्वंवरुणा३पाश्याऽ१सा२३यि । हाउ हाउ
३र २र ३र र २र २र ४ ३
हाउ । तेजा ओवा । २ । तेजा ३ ओऽ५वा ६५६ । ई
१ १ १ १
२३४५ ॥ १५ ॥
२र र र ३ २र ३र र २ र १ २ १
हाउ हाउ हाउ । सत्या ओवा । ३ । दिदीहि विश्वतस्पृथुः ।
२ र र १ २ — २ र र १ २
उद्यामेषिरा ३ जाः पाऽ १ थूं २ । अहामिमानो ३ आक्तूऽ १
— २ र १ २ — २
भा २ यिः । पश्यञ्जन्मानी ३ सूरा ऽ १ या २ । अयुक्तसप्ता ३

१ २ — २२२ १ २ —
शुन्ध्यू ऽ १ वा ऽ २ः । सूरोरथस्या ३ नाप्त्रा ऽ १ या २ः ।
२२ २ १ २ — २ २ १२
ताभिर्याति स्वा ३ युक्ता ऽ १ थिभी २ ः । सप्तत्वाहरी ३ तोरा
— २ १ २ — २२ २
ऽ १ था २ यि । वहन्ति देवा ३ सूरा ऽ १ या २ । शोचिष्केशंवी
१ २ २२ २ २ ३ २२ ३२ २
३ चाक्षा ऽ १ णा २३ । हाउ हाउ हाउ । सत्या ओवा । २ ।
३ २ ४ ३ १ १ १ १
सत्या ३ ओ ५ वा ६५६ । इ २३४५ ॥ १६ ॥

२२ २ २ ३ २२ ३२ २ २ २ १ २ १
हाउ हाउ हाउ । ऋता ओवा । ३ । दिदीहि विश्वतस्पृथुः ।
२ २ २ १ २ — २ २ २ १ २
उद्यामेषिरा ३ जाः पाऽ १ र्थू २ । अहामिमानो ३ आक्तू ऽ १
— २ २ १ २ — २
भा २ यिः । पश्यन्नन्मानी ३ सूरा ऽ १ या २ । अयुक्तसप्ता ३
१ २ — २२ २ १ २ —
शुन्ध्यू ऽ १ वा ऽ २ः । सूरोरथस्या ३ नाप्त्रा ऽ १ या २ः ।
२२ २ १ २ — २ २ १
ताभिर्याति स्वा ३ युक्ता ऽ १ थिभि २ ः । सप्तत्वाहरी ३ तोरा
— २ १ २ — २२ २
ऽ १ था २ यि । वहन्ति देवा ३ सूरा ऽ १ या २ । शोचिष्केशंवी
१ २ २२ २ २ ३ २२ ३२ २
३ चाक्षा ऽ १ णा २३ । हाउ हाउ हाउ । ऋता ओवा । २ ।
३ २ ४ ३ १ १ १ १
ऋता ३ ओ ऽ ५ वा ६५६ । इ २३४५ ॥ १७ ॥

१ १ २२ १ २२ १२ २२ १२ २२ १ २ १२ २ १ २
वाक् । मनः प्राणः प्राणो ऽपानो व्यानश्चक्षुः श्रोत्र ँ शर्म-
१ २ १२ १२ २ १२ २२ १ १
वर्म भूतिः प्रतिष्ठा । आदित्यः पित्र्यम् ।३। आयुःपित्र्यम् ॥ ३॥ १८॥

२ २२ १२ — २
अन्तर्देवेषू ३ रोचा १ सा २ यि । ३ । अन्तश्चरती ३
१२ — २ २२ १२ — २
रोचा १ ना २ । अस्य प्राणादा ३ पाना १ ता २ यि । व्यख्य-
१२ — २ २२ १२ —
न्महो ३ षोदा १ यिवा २ म् । अन्तर्देवेषु ३ रोचा १ सा २ यि
२ २२ १ १ ^ ३ ५२ २
। २ । अन्तर्देवेषू ३ रो २३ । चा २ । सा २३४ । औहोवा ।
२ २२१२ २ २ ३ १११
ए ३ । देवादिवाज्योती २३४५: ॥ १९ ॥

२२ २ २ २ १ २ २ २२१ २ २ १
हाउ हाउ हाउ । भ्राजाभ्राज । ३ । आयुरायुः । ३ । उदु-
२ २ २२ २ १ २२ २ ७ २
त्यज्ञा । ३ । तवेदसम् । ३ । चित्रन्देवानामुदगादनी २३ का ३
२२ २२ १ २ २ २२ १ २ २ २ २
म् । हाउ । ३ । भ्राजा भ्राज । ३ । आयुरायुः । ३ । देवं-
२ २ १ ७ २ २ २
वहा । ३ । चक्षुर्मित्रस्य वरुणास्यआ २३ ग्ना ३ यिः । हाउ ।३।
२२ १ २ २ २२ १ २ २ १ २ २ १२ १ २ २
भ्राजाभ्राज । ३ । आयुरायुः । ३ । तिकेतवः । ३ । आप्राद्यावा
२ ७ २ २२ २२ १ २-२
पृथिवी आन्तरी २३ क्षा ३ म् । हाउ । ३ । भ्राजाभ्राज । ३ ।
२२ १ २ २ १२ २ २ १२ २ २ ७
आयुरायुः । ३ । दृशे विश्वा । ३ । सूर्य आत्मा जगतस्तास्थुषा
२ २२ २२ १ २ २ २२ १ २ २
२३ श्चा ३ । हाउ । ३ । भ्राजाभ्राज । ३ । आयुरायुः । ३ ।
१ २२ १ २ २ २ २२ १२ २ २ ३
यसूर्यम् । २ । यसू २३ रियाउ । वा ३ । ए ३ । देवा दिवाज्योती
२ १ १ १
२३४५: ॥ २० ॥

२२ २ २ ३२ २२ ३२ २ २ २ २८
हाउ हाउ हाउ। भ्राजाओवा। ३। उदुत्यञ्जा। ३। हाउ
१ २ १ २ २ २७ २ २२
३ वा। आर्चिः। इन्द्रन्नरो नेमधिताहवा २३ न्ता ३ यि। हाउ
२ २ ३२ २१ ३२ २ २२ २८
हाउ हाउ। भ्राजाओवा।३। तवेदसम्। ३। हा ऽ उ ३ वा।
१ २ २२ २ २ ३२ २२ ३२ २ २२ २
शोचिः। हाउ हाउ हाउ। भ्राजा ओवा। ३। देवंवहा। ३।
८ १ २ १ २ २ ७ २
हा ऽ उ ३ वा। तापः। यत्पार्यायुनजतायिधिया २३ स्ता
२२ २ २ ३२ २२ ३२ २ २ २
३ ः। हाउ हाउ हाउ। भ्राजा ओवा। ३। तिकेतवः। ३।
२८ १ २ २२ २ २ ३२ २२ ३२ २
हा ऽ उ ३ वा। हारः। हाउ हाउ हाउ। भ्राजा ओवा। ३।
२ २ २८ १ २ १२ २ २
दृशेविश्वा। ३। हा ऽ उ ३ वा। साहः। शूरोनृषा ताश्रवसा-
७ २ २२ २ २ ३२ २२ ३२ २
श्चका २३ मा ३ यि। हाउ हाउ हाउ। भ्राजा ओवा। ३।
२२ २८ १ २ २२ २ २ ३२ २२
यसूर्यम्। ३। हा ऽ उ ३ वा। नारः। हाउ हाउ हाउ। भ्राजा
३२ २ २ २ २८ १२ २
ओवा। ३। दृशेविश्वा। ३। हा ऽ उ ३ वा। भा २ ः। आगो
२ २ ७ २ २२ २ २ ३२ २२
मति व्रजेभ जातुवा २३ श्रा ३ ः। हाउ हाउ हाउ। भ्राजा
३२ २ २ २ ३ १ १ १ १
ओवा। ३। यसूर्यम्। ३। हा ऽ उ ३ वा ३। इ २३४५ ॥२१॥

ततः सन्त्वा भूतानीत्यारभ्य उन्नयामीति यावत्पठनीयानि।

इति मध्याह्नसन्ध्याप्रयोगः ॥

अथ ऋषिप्रासो ब्रह्मयज्ञप्रयोगः ।

पादौ हस्तौ प्रक्षाल्य, द्विराचम्य, प्रागग्रेषु दर्भेषु प्राङ्मुख आसीनो दर्भपाणिर्देशकालौ सङ्कीर्त्य 'परमेश्वरप्रीतये ब्रह्मयज्ञमहं करिष्ये' इति सङ्कल्प्य, हस्तौ गोकर्णाकृतिवज्जान्वोरुपरि विन्यस्य, मस्तकादीन्यङ्गान्यकम्पयंस्तन्मनस्को ऋषिच्छन्दोदेवताब्राह्मणान्संस्मृत्य, प्रणवव्याहृतिगायत्रीं आदौ पठित्वा, दक्षहस्ताङ्गुलीनां मध्यमपर्वसु स्वरोच्चारणसमये अङ्गुष्ठं योजयन्, दीर्घाक्षरं सव्यहस्ताङ्गुलिग्रहणेन दर्शयन्, हस्ताग्रकृतदृष्टिः सामसु अङ्गुष्ठतर्जन्योर्यवान्तरं; संहितायां तिलान्तरं कुर्वन्स्पष्टाक्षरं मध्यमवृत्त्या मध्यमस्वरेण एकया वृत्त्या शक्त्या पठेत् । पुनः प्रणवव्याहृतिसावित्रीं पठित्वा 'ॐ नमो ब्रह्मणे' इति त्रिरुक्त्वा समापयेत् । ततो रुद्रसंहितामुपतिष्ठेत् । ब्रह्मयज्ञादर्वाग्वा । अस्य मूलवाक्यानि नारदोक्तशिक्षायां द्रष्टव्यानि ।

इति ब्रह्मयज्ञः ।

अथ पञ्च महायज्ञाः ।

तत्र प्रातर्होमोत्तरं पाकार्थमावसथ्याग्नेरेकदेशं गृहीत्वा, पाकशालास्थचुल्ल्यां संस्थाप्य, पाकं कृत्वा, पुनस्तावदेव ततः समादाय शालाग्नौ प्रक्षिपेत् (एतत्साग्निकैः कार्यम्) पश्चाद्वैश्वदेवः ।

अथ वैश्वदेवः ।

तत्रासादनक्रमः । स्वदक्षिणे शुद्धोदकपात्रम् । उत्तरतोऽग्नेरपाम्पूर्णश्रमसः । ओदनादि हविष्यं घृतादिसिक्तं स्वपुरतः । समिद्वयञ्च । एवमासाद्याचम्य प्राणानायम्य, गायत्र्याभिमन्त्रितो-

दकेन हौमीयं संप्रोक्ष्य, देशकालौ सङ्कीर्त्य 'ममात्मसंस्कारार्थं श्रीपरमेश्वरप्रीतये नित्यविधिरूपं वैश्वदेवाख्यं कर्माहं करिष्ये' इति सङ्कल्प्य, भूतमिति ब्रूहीति पत्नीं प्रति ब्रूयात् । असन्निहितायां पत्न्यामन्यां वा । ततः पत्नी क्षालितकरचरणा भक्तियुक्तया वाचा भूतमिति प्रतिब्रूयात् । ततः स्वयं ओमित्युच्चैस्तस्मै नमस्तन्माख्या इति उपांशु ब्रूयात् ।

अथ होमादि बलिदानान्तं वाग्यतः स्यात् । ततो दक्षिणं जान्वाच्य, यथाविधिना भूजप-पर्युक्षण-समिद्धोमादीन्विधाय, प्रजापतये स्वाहेति मनसा मध्येऽग्नौ हुत्वा, मनसैवं त्यागं विधाय, अग्नये स्विष्टकृते स्वाहेति ऐशान्यां हुत्वा, इदमग्नये स्विष्टकृते न ममेति त्यागं विधाय, समिद्धोमानुपर्युक्षणमेकादीन्विधायाग्निं परिक्रम्य, चमसं निनीयाद्भिः पुनः पूरयेत् । ततो हुतशेषेण बलिदानम् । कुण्डसमीपे संमार्जनादिसंस्कृते भूप्रदेशे दक्षिणहस्तेन चमसस्थं जलमादाय, प्राक्संस्थधारां दत्वा बलिचतुष्टयपर्याप्तमन्नमादाय—

१—'ॐ पृथिव्यै नमः' इदं पृथिव्यै न ममेति त्यागः । २—'ॐ वायवे नमः' इति तत्पूर्वस्यां, वायवे न मम । ३—'ॐ विश्वेभ्यो देवेभ्यो नमः' इदं विश्वेभ्यो देवेभ्यो न मम । ४—'ॐ प्रजापतये नमः' इदं प्रजापतये न मम । मानसोऽयं बलित्यागश्च ।

एवमेकपङ्क्त्यां प्राक्संस्थं बलिचतुष्टयं दत्वा, तदुपरि पूर्ववज्जलं सिञ्चेत् । ततस्तदुत्तरस्यां पूर्ववज्जलमासिच्य तावदेवान्नमादाय तथैव बलिदानम् ।

१—ॐ अद्भ्यो नमः । इदं अद्भ्यो न मम । २—ॐ ओषधिवनस्पतिभ्यो नमः । इदमोषधिवनस्पतिभ्यो न मम । ३—ॐ आकाशाय नमः । इदमाकाशाय न मम । ४—ॐ कामाय नमः । इदं कामाय न मम । पुनस्तथैवोपरि सेकः ।

पुनस्तदुत्तरतः जलमासिच्य, तावदेवान्नं आदाय, तथैव बलिदानम् । १—ॐ मन्यवे नमः । इदं मन्यवे न मम । २—ॐ इन्द्राय नमः । इदं इन्द्राय न मम । ३—ॐ वासुकये नमः । इदं वासुकये न मम । ४—ॐ ब्रह्मणे नमः । इदं ब्रह्मणे न मम । ततस्तदुपरि पूर्ववज्जलासेकः ।

ततस्तदुत्तरस्यां किञ्चिज्जलमासिच्य 'ॐ रक्षोजनेभ्यो नमः' इदं रक्षोजनेभ्यो न मम । इति बलिदानम् । ततस्तदुपरि जलमासिच्य उदकं स्पृशेत् ।

ततो बलिशेषमन्नं जलेनाभ्युक्ष्य, कृतापसव्यः सव्यं जान्वाच्य, सर्वेषां दक्षिणतो जलमासिच्य 'ॐ पितृभ्यः स्वधा' इति पितृतीर्थेन बलिदानम् । इदं पितृभ्यो न मम । ततस्तदुपरि जलमासिच्य उदकं स्पृशेत् ।

ततः सर्वेषामुत्तरतो 'ॐ यवेभ्यो नमः' इति यवाग्रयणोत्तरं व्रीह्याग्रयणं यावत् । व्रीह्याग्रयणोत्तरं 'ॐ व्रीहिभ्यो नमः' इति आयवाग्रयणं तथैव त्यागः । स्वकर्तृकोऽयं बलिः । प्रवासादावेतस्य लोपः । ततः कृताञ्जलिपुटोऽग्निं प्रार्थयेत् ।

आरोग्यमायुरैश्वर्यं धीर्धृतिः शं बलं यशः ।
ओजो वर्चः पशून् वीर्यं ब्रह्म ब्राह्मण्यमेव च ।

सौभाग्यं कर्मसिद्धिश्च कुलज्यैष्ठ्यं सुकर्तृताम् ।
सर्वमेतत्सर्वसाक्षिन् द्रवीणोद रिरीहि णः ॥
ततो वामदेव्यं गीत्वा चतुर्भिश्चेत्यग्निं प्रणमेत् ॥

इति वैश्वदेवः ।

अथ नित्यश्राद्धम् ।

आचम्य प्राणानायम्य, देशकालौ सङ्कीर्त्यापसव्यं कृत्वा 'गोत्राणां पितृपितामहप्रपितामहानां अमुकामुकामुकशर्मणां, मातामहप्रमातामहवृद्धप्रमातामहानां अमुकामुकामुकशर्मणां पितृयज्ञसिद्ध्ये नित्यश्राद्धमहं करिष्ये' इति सङ्कल्प्य, उदङ्मुखान् ब्राह्मणान्ब्राह्मणं वा उपवेश्य, द्विगुणभुग्नकुशसहितं तिलोदकमादाय 'अमुकगोत्राः अस्मत्पितृपितामहप्रपितामहाः अमुकामुकामुकशर्माणः एतद्वः पाद्यं' इत्युक्त्वा, पितृतीर्थेन ब्राह्मणस्य पादयोर्निःक्षिपेत् । मातामहादीनां द्वितीयश्चेत्तदा पृथक्तेभ्यो देयमेकश्चेत्तन्त्रेण ।

तत आसनम् । अमुकगोत्रेभ्योऽस्मत्पित्रादयुच्चार्य, मातामहादीनामपि नामगोत्रादयुच्चार्य 'अमुकशर्मभ्य इदमासनं स्वधा' इत्युक्त्वा जलं दक्षिणहस्ते दत्वा, विप्रवामभागे द्विगुणदर्भसतिलकुशासनं दद्यात् ।

ततश्चन्दनेन मूर्द्धांसजानुपादेषु वामाङ्गादि विष्णुमन्त्रेण सम्पूज्यार्चनसङ्कल्पं कुर्यात् । 'यथादत्तं गन्धाद्यर्चनं गोत्रेभ्योऽस्मत्पित्रादयुच्चार्य अमुकशर्मभ्यो यथायथाविभागं वः स्वधे'त्युक्त्वा जलं दद्यात् ।

ततो भोजनार्थं पात्रेऽन्नं परिविष्य 'सत्यं त्वर्तेन परिषिञ्चा-

मीति' अभिषिञ्चेत् 'ॐ पृथिवी ते पात्रं' इत्यादि विष्णुमन्त्रान्तमुच्चार्य 'इदमन्नादि यदत्तं यच्च दास्यामि तत्सर्वं तृप्तिपर्यन्तं भोजनं गोत्रेभ्य' इत्याद्यभिधाय अमुकामुकामुकशर्मभ्यो यथायथाविभागं वः स्वधेत्युक्त्वोदकं भुव्युत्सृजेत् । ततो भोजयित्वा, किञ्चित्फलं काकिणीं वा दत्वा नमस्कुर्यात् । अन्नसङ्कल्पान्तं नित्यश्राद्धम् ।

इति नित्यश्राद्धम् ।

अथ मनुष्ययज्ञः ॥

आचम्य प्राणानायम्य । देशकालौ सङ्कीर्त्य, स्नानान्तं विधाय 'श्रीपरमेश्वरप्रीतये नित्यविधिरूपं मनुष्ययज्ञमहं करिष्ये' इति सङ्कल्प्य, आगतमतिथिं पाद्यादिभिः सम्पूज्यान्नं परिविष्य, सकुशजलमादाय निवीती 'इदं अन्नादि यदत्तं तृप्तिपर्यन्तं दास्यमानञ्च सनकादिमनुष्येभ्यो हन्तेत्युच्चार्य' प्रजापतितीर्थेन जलमुत्सृजेत् ।

एवं पितृयज्ञमनुष्ययज्ञकरणासमर्थेन भिक्षा-पुष्कल-हन्तकारादिशक्त्या अन्नमुद्धृत्य प्राचीनावीती सद्विगुणदर्भं जलमादाय 'पितृयज्ञसिद्ध्यर्थमिदमन्नं सार्द्धं पितृभ्यः स्वधेत्युच्चार्य' जलं क्षिप्त्वा, अवशिष्टस्यान्नस्यार्द्धभागं निवीती सनकादिमनुष्येभ्यो हन्तेत्युक्त्वा जलमुत्सृजेत् ।

इति मनुष्ययज्ञः ।

ततः 'सुरभ्यै नमः' इति सुरभीं सम्पूज्य गोग्रासं दद्यात् ।

सुरभी वैष्णवी माता नित्यं विष्णुपदे स्थिता ।
गोग्रासन्तु मया दत्तं सुरभि प्रतिगृह्यताम् ॥

इति मन्त्रेण गोग्रासं दत्वा, गोभ्यो न ममेति त्यागः ।

ततः—

पिपीलिकाः कीटपतङ्गसङ्घा बुभुक्षिताः कर्मनिबन्धबद्धाः ।
प्रयान्तु ते तृप्तिमिदं मयान्नं तेभ्यो विसृष्टं सुखिनो भवन्तु ॥

इति मन्त्रेण सर्वभूतेभ्यो न ममेति सर्वभूतबलिं गृहाङ्गणे दद्यात् । ततः—

ऐन्द्रवारुणवायव्या याम्या वै नैर्ऋतास्तथा ।
वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयार्पितम् ॥

इति वायसेभ्यो न ममेति वायसेभ्यो गृहादुबहिर्बलिर्देयः । ततो—

द्वौ श्वानौ श्यामशबलौ वैवस्वतकुलोद्भवौ ।
ताभ्यां बलिं प्रदास्यामि रक्षेतां पथि मां सदा ॥

इति श्वभ्यामिदं न ममेति श्वबलिर्गृहादुबहिर्देयः । ततः पादौ प्रक्षाल्याचम्य, बालादीन् भोजयित्वा स्वयं भुञ्जीत ।

इति गोग्रासादिबलिदानम् ।

अथ भोजनप्रयोगः ।

सुप्रक्षालितपाणिपादमुख आचम्य, शुचौ संवृते देशे चतुरस्रमण्डले सुपीठाद्यासने प्राङ्मुख उपविश्य, पात्रे परिवेशितमन्नं प्रणम्य, अस्माकं नित्यमस्त्वेतदिति सम्प्रार्थ्य, सव्याहृतिगायत्र्या तदन्नमभिमन्त्र्य जलेन 'ॐ सत्यं त्वर्तेन परिषिञ्चामीति' परिषिञ्च्य, घृताक्तमन्नमादाय, स्वाग्रे दक्षिणभागे बलित्रयं प्राक्संस्थं दद्यात् ।

१—ॐ भूपतये नमः । २—ॐ भुवनपतये नमः । ३—ॐ भूतानां पतये नमः ।

ततश्चतुर्थो विष्णवे बलिर्देय इति केचित् । ततो जलमादाय 'ॐ अमृतोपस्तरणमसि स्वाहेति' मन्त्रेण जलं प्राश्य, गार्हपत्यादीनात्मनि विचिन्त्य, तर्जनीमध्यमाङ्गुष्ठैरन्नमादाय, १—ॐ प्राणाय स्वाहेति मुखे हुत्वा, मध्यमानामिकाङ्गुष्ठैः २—ॐ व्यानाय स्वाहेति हुत्वा, कनिष्ठिकानामिकाङ्गुष्ठैः ३—ॐ अपानाय स्वाहेति हुत्वा, सर्वाभिः सहाङ्गुष्ठैः ४—ॐ समानाय स्वाहेति हुत्वा, तर्जनीं विना ५—ॐ उदानाय स्वाहेति जुहुयात् । एतान्पञ्च ग्रासान्महामौनी दन्तैरखण्डयन्निगीर्य उदकं स्पृष्ट्वा, शिखां विमुच्यान्यदश्नीयात् । ततो भुक्त्वाऽवशिष्टादन्नमादाय—

रौरवे पुण्यनिलये पद्मार्बुदनिवासिनाम् ।
उच्छिष्टभागधेयानामक्षय्यमुपतिष्ठतु ॥

इति मन्त्रेणोच्छिष्टभागधेयेभ्योऽन्नं सोदकं भुवि दत्त्वा, अप्रक्षालितेनैव हस्तेन जलमादाय, ॐ अमृतापिधानमसि स्वाहेति मन्त्रेणार्द्धं पीत्वाऽवशिष्टं पितृतीर्थेन भूमौ प्रक्षिप्य, मृज्जलाभ्यां हस्तौ मुखञ्च संशोध्याचम्य जलमादाय ।

ॐ अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठन्तु समाश्रितः ।
ईशः सर्वस्य जगतः प्रभुः प्रीणातु विश्वभुक् ॥

इति मन्त्रेण दक्षिणपादाङ्गुष्ठे स्नापयित्वा, अभीष्टदेवतां स्मरेत् ।

अगस्तिरग्निर्वडवानलश्च भुक्तं मयान्नं जरयन्त्वशेषम् ।
सुखञ्च मे तत्परिणामजं वै यच्छन्त्वरोगं मम वाऽस्तु देहे ॥

विष्णुरक्षा यथैवान्नं परिणामश्च वै यथा ।
सत्येन तेन यदुभुक्तं जीर्यत्वन्नमिदं तथा ॥
इत्युच्चार्य स्वहस्तेन परिमार्ज्य तथोदरम् ।
अनायासप्रदायीनि कुर्यात्कर्माण्यतन्द्रितः ॥

इति भोजनप्रयोगः ।

अथ सायंसन्ध्या ।

ततः सायङ्काले ऽग्निं प्रादुष्कृत्य (एतत्साग्निकैः कार्यम्) सायंसन्ध्यां कुर्यात् । तत्र सर्वं प्रातःसन्ध्यावत् । विशेषो यथा । 'सायंसन्ध्योपासनमहं करिष्ये' इति सङ्कल्पे । ध्यानावाहने विशेषः—

अपराह्णे तु या सन्ध्या कृष्णाङ्गी कृष्णवाससा ।
गरुडस्कन्धमारूढा तथा च विष्णुदैवता ।
वृद्धा सामवेदमुखी विष्णुना सह आवह ।
आयाहि वरदे देवि ह्यक्षरे विष्णुवादिनि ।
सरस्वति च्छन्दसां मातर्विष्णुयोने नमोऽस्तु ते ॥

आचमने विशेषः । अग्निश्चमेति नारायण ऋषिः प्रकृतिश्छन्दः अग्निर्देवता आचमने विनियोगः ।

ॐ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम् । यदद्य पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुम्पतु । यत्किञ्च दुरितं मयि इदमहं माममृत योनौ सत्ये ज्योतिषि जुहोमि स्वाहा ॥

ततो ऋतञ्च सत्यञ्चेत्यनेनाघमर्षणानन्तरं उपविष्ट एवाञ्जलित्रयं गायत्र्या सूर्याभिमुखः क्षिपेत् । ततः सूर्यमुपस्थाय, सूर्याभि-

मुखो नासाग्रे अधोमुखधृतहस्तो मौनी गायत्रीं सञ्जप्य, सङ्कल्पं कुर्यात्। 'अनेन गायत्र्या मत्कृतेन जाप्येन विष्ण्वात्मा रविः प्रीयताम्। तत 'उत्तरे शिखरेति' विसृज्य सायंहोमं कुर्यात्।

इति सायंसन्ध्या।

ततः सामपठनम्। एषो उषेति उषा गायत्र्यश्विनौ, आबुन्द इति उषा गायत्रीन्द्रः, ऋजुनीतीति कुत्सो गायत्री विश्वेदेवाः, प्रत्युअदर्शीति उषा बृहत्युषा, उद्वेदमीति त्रयाणां सुपर्णो गायत्रीन्द्रः जपे विनियोगः। एवं ऋष्यादीन्संस्मृत्य सामानि पठेत्।

५र २ १ र २ र . १ २ १ २ २

ॐ एषो उषाः। आपूर्विया। व्युच्छति। होवा ३ हायि।

१र २ ३ २ ३र २ २ १

मियादा २३ यिवा ३४:। स्तुषा ३४ यिवामा ३। श्विनो २३४

५ ४ ५

वा। बृ ५ हो ६ हायि॥ १॥

५र र २ र १ १ २ १

आबुन्दंवृ। त्रहाद। हायि। जातः पृच्छा ३ तू। विमा २

३ ५ २ १ २ १ २ र १ २

ता २३४ राम्। कउग्रा २३: के। हा शृण्विरे। इडा २३ भा-

१

३४३। ओ २३४५ इ। डा॥ २॥

५ र ४ ५ ४ ५ ४ २ १र २ १ २

ऋजुनीतीनोवरुणः। इहा। मित्रो नयतिविद्वा २३ न्त्साः।

८ २ २ १र २ १ २ १ २ २ २

इहा। अर्यमादा २३ यिवायि। इहा। सजोषा ३ उवा ३। ई

५

३४ हा॥ ३॥

२८ र १ २र र र र र र

मात्युवदर्शायतोवा। ऊच्छन्ती दुहिता दिवो अपो मही वृणुते

१ २ १ २ १ ४ १ २
व । क्षुषा २३ तमाः । ज्योतिष्कृणो २३ ती ३ । सूना २३४ रा ।
५ ५ २ २ १ १ २ २ २ २ २
ओवा ६ । हाउवा ॥ ज्योतोवा । कार्णोति सूनरी उदुस्रियाः सृजते
२ १ २ १ २ १ ४ १
सु । रिया २३ः स चा । उद्यन्नक्षा २३ त्राइम् । आर्चा
२ २ ५ ५ २ १ २ २
२३४ इवात् । ओवा ६ । हाउवा ॥ उद्योवा । नाक्षत्रमर्च्चिवत्तवे
२ २ १ २ १ २२ १ ४
दुषो विद्युषि सू । रिया २३ स्यचा । साम्भक्तेना २३ गा ३ ।
१ २ २ ५ ५ १
माइमा २३४ हा । ओवा ६ । हाउवा । अस् ॥ ४ ॥
५ २ ४ ५ १ २ ३ ० २ १ २ १ ७ ८
उद्वेदय्योवा । श्रूतप्रमा २३४ घाम् । वृषभन्ना । रिया २
३ ० — १ २ १ २२ १ २
पा २३४ साम् । आ २ स्ना । रा २३ मे । षायि सूरिया । औ
४ ५ ४
३ होवा । हो ५ इ । डा ॥ ५ ॥
५ २ २ ५ ४ ३ ४ ५ १ ३
उद्वेदभिश्रुतामा ६ घाम् । वृषभन्नर्या । हुम् । पा २३४
१ २ २ २२ १ २ १ ५ ४
साम् । आस्ता ३ उवा । रामायि । षिम् २३४ वा । रा ६ यो
५
६ हायि ॥ ६ ॥
४ २ ५ ४ ५ ४ २ ५ ४ ५ ४ ५ ४ ३ ४ ५ २ २ २
उद्वेदभिश्रुता मघम् । इय इयाहायि । वृषभन्नर्या । हा ३ हा
१ ५ १ २ २ १ ८ ३
३ यि । पा २३४ साम् । आन्ता ३ उवा ३ । रा २ मा २३४
५ २ २ २ २ ३ १ १ २ १
औहोवा । षिम्रूरिया २३४५ ॥ ७ ॥

ततः रात्रिभोजने 'ऋतं त्वा सत्येन परिषिञ्चामीति' अन्न-प्रोक्षणे विशेषः। रात्रौ दत्ते सर्वेभ्योऽन्ने फलीकरणकुक्कुसा ओदनास्रावणं जलञ्च एकीकृत्य 'ॐ रुद्राय नमः' इति सुप्रदेशे बलिर्देयः। रुद्राय न ममेति त्यागं विधाय, उदकं स्पृशेत्। ततः शयनम्।

इति श्रीशुक्लविश्रामात्मज-शिवरामविरचितागोभिलगृह्यपद्धत्यनुसारिणी कौथुमीशाखीयाआह्निकप्रयोगपद्धतिः समाप्ता॥

प्राप्तिस्थानम्—

चौखम्बा संस्कृत पुस्तकालय,

बनारस सिटी।

अस्मत् प्रकाशित ग्रन्थाना साक्षस—सूचिपत्रम् ।

अग्निष्टोमपद्धतिः । ग्रन्थरत्नेऽस्मिन् "आध्वर्यवपद्धतिः"—कर्कानुसारिणी, साहित्य "औद्गात्रपद्धतिः"—लाट्यायनद्राह्यायणसूत्रानुसारिणी, "हौत्रपद्धतिः"—शाङ्खायनश्रौतसूत्रानुसारिणी च सन्निविष्टास्ति । १–२ खण्ड । ३)

आपस्तम्बगृह्यसूत्रम् । श्रीहरदत्तप्रणीतयाऽनाकुलाख्या व्याख्यया, श्रीसुदर्शनाचार्यप्रणीतया तात्पर्यदर्शनाख्यया व्याख्यया च समलङ्कृतम् । ४)

आपस्तम्बधर्मसूत्रम् । श्रीमद्धरदत्तमिश्र विरचिता उज्ज्वलाख्यया वृत्त्या संवलितम् । ४)

आश्वलायनसूत्रप्रयोगदीपिका । श्रीमच्चनाचार्यभट्टविरचिता । ३)

अन्त्यकर्मदीपकः । आशौचकालनिर्णय सहितः । प्रेतकर्मब्रह्मीभूतयतिकर्मनिरूपणात्मकः । म० म० पर्वतीय नित्यानन्द विरचितः । १॥)

उपनयनपद्धतिः । वेदाचार्य पण्डितप्रवर श्रीविद्याधरशर्म गौडेन विस्तृत टिप्पण्यादिना परिशिष्ट संयोज्य सुसंस्कृता । सुलभसंस्करण ।–) राजसंस्करण ।=)

ऋग्वेदप्रातिशाख्यम् । श्रीमहर्षिशौनकप्रणीतम् । उव्वटभाष्यसहितम् । ४)

ऋग्वेदसंहिता । सायणभाष्य सहिता । १–५ अष्टकम् । ४०)

कात्यायनश्रौतसूत्रम्—श्रीकर्कार्चार्यविरचितभाष्य सहितम् । सम्पूर्णम् । १२)

कातियेष्टिदीपकः (दर्शपौर्णमासपद्धतिः) म० म० पर्वतीय पं० नित्यानन्द विरचितः । १)

कातीयतर्पणपद्धतिः । भाषा टीका सहितम् ।)॥।

गोदानपद्धतिः । वेदाचार्य श्री अनन्तरामडोगरा शास्त्रि संकलिता । –)

गोभिलगृह्यसूत्रम् । म०म० श्रीमुकुन्दशर्मणा विरचितया संस्कृत व्याख्यया समलङ्कृतम् । ३)

चतुर्वेदभाष्यभूमिकासंग्रहः । (सायणाचार्य विरचितानां स्ववेदभाष्यभूमिकानां संग्रहः) । २॥)

चरणव्यूहपरिशिष्टसूत्रम् । श्रीमहीदासपण्डितप्रणीत भाष्यसहितम् । ॥)

चूडाकरणपद्धतिः । वेदाचार्य पण्डितप्रवर श्रीविद्याधर शर्म गौडेन विस्तृत टिप्पण्यादिना परिशिष्ट संयोज्य सुसंस्कृता । =)

ताण्ड्यमहाब्राह्मणम् । सायणाचार्यविरचितभाष्यसहितम् । सम्पूर्णम् १२)

नित्यकृत्यरत्नमाला । म० म० मुकुन्दझाबख्शी कृतः । ॥=)

नीतिमञ्जरी । सभाष्या श्रीद्याद्विवेद विरचिता । भूमिका–टिप्पणी–परिशिष्टादिभिः संयोज्य सम्पादिता । ४॥)

पारस्करगृह्यसूत्रम् । कात्यायनसूत्रीयश्राद्ध-शौच स्नान-भोजन कल्प सहितम् ।=)

पारस्करगृह्यसूत्रम् । हरिहर-गदाधर-जयरामभाष्यत्रयेण सहितम् । ३)
पुरुषसूक्तम् । सायण-महीधर-मंगल-निम्बार्कमतभाष्यचतुष्टयसहितम् । १।)
पुष्पसूत्रम् । सामप्रातिशाख्यं श्रीमदजातशत्रुकृतभाष्यसहितम् । ४॥)
बौधायनधर्मसूत्रम् । श्रीगोविन्दस्वामिप्रणीतविवरणसमेतम् । ४)
मन्त्रार्थदीपिका । श्रीशत्रुघ्नविरचिता । सटीक । २)
लाट्यायनश्रौतसूत्रम् । अग्निष्टोमान्तम् । सटीकम् । २)
वर्षकृत्यदीपकः । म० म० पं० श्रीनित्यानन्दपन्त पर्वतीयकृतः । ३॥)
विवाहपद्धतिः । वेदाचार्य पण्डितप्रवर श्रीविद्याधरशर्म गौडेन विस्तृत टिप्पण्यादिना परिशिष्ट संयोज्य सुसंस्कृता । सुलभ संस्करणम् ।-)
राजसंस्करणम् ।=)
शतपथब्राह्मणम् । (शुक्लयजुर्वेदीयमाध्यन्दिनशाखीयं) सस्वरम् । वेदविशारद मीमांसाकेसरी पं० श्रीचिन्नस्वामीशास्त्रिणा उपयुक्तटिप्पणीसहितम् । (प्रथम भाग १-४ काण्ड) २॥)
(द्वितीय भाग ५-९ काण्ड) २॥)
शुक्लयजुर्वेदकाण्वसंहिता । श्रीसायणाचार्यविरचितभाष्यसहिता । ६)
शुक्लयजुर्वेदसंहिता । वाजसनेयिमाध्यन्दिनशाखीया । श्रीमदुव्वटाचार्य-विरचित मन्त्रभाष्येण श्रीमन्महीधराचार्यविरचितवेददीपेन च सहिता । ८)
शुल्बसूत्रम् । श्रीकर्कभाष्य-महीधरवृत्ति सहितम् । ।=)
शुक्लयजुर्वेदीय सन्ध्योपासनविधिः । भाषा टीका सहितः ।)॥
शिलान्यासपद्धतिः । वेदाचार्य पण्डितप्रवर श्रीविद्याधरशर्म गौडेन विस्तृत टिप्पण्यादिना परिशिष्ट संयोज्य सुसंस्कृता । ६)
श्राद्धविवेकः । म० म० श्रीरुद्रधरकृतः । वेदाचार्य पं० अनन्तरामडोगरा शास्त्रिकृत टिप्पणी सहितः । १)
श्रौतसूत्रम् । श्रीमन्महर्षिकात्यायनप्रणीतं देवयाज्ञिकपद्धति सहितम् । १५)
श्रीसूक्तम् । विद्यारण्य-पृथ्वीधर-श्रीकण्ठाचार्यकृतभाष्यत्रयेण च समलंकृतम् ।=)
सामवेदीयरुद्रजपविधिः । पञ्चवक्त्रपूजनम्, लघु रु० द्रविधानयुतञ्च । ॥)
संस्कारदीपकः । मं० म० पण्डित नित्यानन्दपन्त पर्वतीय विरचितः । १-३ भाग सम्पूर्ण । ८)
संस्कारगणपतिः । पण्डितप्रवरकर्मकाण्डाचार्य श्रीमद्रामकृष्णप्रणीतः । संस्कारान्तस्य पारस्कारगृह्यसूत्रस्यातिविस्तृत व्याख्यानस्वरूपः । १५)